चतुर्थः स्तबकः प्रारभ्यते

श्रीहरिः॥ ग० ॥ अथ शरदृतौ कस्यांचिद्वेलायां वियद्वलयविभूषणवरविमानाऽऽवलिवासिविलासिवारविलासिनीविजृंभितविविधवचनादिविलासबहलविश्रृंखलोत्सवविस्मारणदक्षवलक्षप्रतिमल्लवर्णविराजितवपुर्विभुर्विस्त्वरवदनद्युतिसमुच्चयपरिचयपराजिततारारराजान् स्वांगसौंदर्यतरंगमालितरंगकदंबभंगीप्लवनविवशीकृताऽनंगानवयवकोमलिमनिर्जितनवनीतनिचयान् भूषणमणिगणप्रभाप्रकर्षद्विगुणितप्रभापरंपराप्रकलितान् त्वन्निहिताऽगस्त्यजन्मकारणतया समग्रविरहसमुद्रशोषणसमर्थानपि प्रीतिपारावारलल्लहरीलीलालाभाऽतिशयाऽऽर्द्रान् व्रजाधिपव्रजसुंदरीजनव्रजान्यमुनाऽमृतमध्यवर्त्यावर्तगर्तनर्तितकोकनदकुमुदकुवलयकल्हारेंदीवरनिकरनिर्झरन्मकरंदसंदोहाऽऽसवक्षीबषडंघ्रिगणझंकारसहचरनिकुंजपुंजमंडनशिखंडिमंडलहंसकारंडवकोकिलाशुकसारिकाप्रभृतिमंजुसिंजितमुखरितदि

ङ्मुखे विशंकटतटविकीर्णस्वच्छाऽच्छमुक्तामणिप्रतिमवालुकामिलितनिशाकरकरप्रकराऽतिधवलिते वृंदावने वनजावलिविलसद्विशालवक्षःस्थलललितः श्रीकृष्णो रंतुं सुवंशोद्भवाः सुवंशोद्भवाऽऽह्वानमंतरा नाऽऽगच्छंतीति विचिंत्य स्वमुखनिहितसुवंशोद्भववेणुस्वनितैस्तानाकारयामास॥ १ ॥

॥ श्रीकृष्णायनमः ॥ अथ भगवतो रासक्रीडां वर्णयिष्यन् आदौ वेणुवादनेन गोपीनामाह्वानं वर्णयति ॥ अथेत्यादिनागद्येन ॥ अथ वरुणदूताऽऽहृतनंदप्रत्यानयनानंतरं शरदृतौ कस्यां चित् अनिर्वाच्यायां वेलायां श्रीकृष्णः वृंदावने तान् पूर्वं रमणवरप्रदानेनाऽनुगृहीतकुमारीयूथप्रभृतीन्॥व्रजाऽधिपेति ॥ व्रजाऽधिपस्य नंदस्य यो व्रजो देशस्तत्संबंधिनो ये सुंदरीजनव्रजा गोपिकालोकसमूहास्तान् सुवंशोद्भवाः उत्तमकुलोत्पन्नाः सुवंशोद्भवाऽऽह्वानमंतरा उत्तमवंशोत्पन्नाकर्तृकाऽऽकारणं विना नाऽऽगच्छंतीति लौकिकीं प्रसिद्धिं विचिंत्यैव स्वमुखनिहित उत्तमवंशोद्भव उत्तमकुलोत्पन्नः वस्तुतस्तु उत्तमवेणूद्भवो यो वेणुर्मुरलिका तस्य स्वनितैः आकारयामास ॥ आकारणे प्रयोजनं॥रंतुमिति ॥ तैः समूहैः सह विहर्तुमित्यर्थः॥कीदृशः कृष्णः॥वियदिति॥वियद्वलयस्य आकाशमंडलस्य विभूषणान्यलंकारभूतानि यानि वरविमानानि श्रेष्ठविमानानि तेषां या आवलिस्तस्यां वसंति तच्छीला ये विलासिनो देवावारविलासिन्योऽप्सरसश्च तेषां उभयेषां विजृंभिताविस्तृता ये विवि

धवचनादिबिलासास्तैर्बहलो विश्रृंखलश्च निरर्गलो य उत्सवस्तस्य स्मारणे दक्षं दर्शनमात्रेण विस्मृतिजनने निपुणं तच्चतद्धलक्षप्रतिमल्लेन श्वेतप्रतिस्पर्धिना वर्णेन श्यामवर्णेन विराजितं शोभमानं च वपुः शरीरं यस्य एवंविधः॥एतेन भगवद्रूपस्य जगन्मोहकत्वं ध्वनितं॥तथा ॥ विभुर्व्यापकः॥एतेन सकलांऽतर्यामितया स्वैकतानगोपीमनोनिष्ठरिरंसाज्ञानवत्ता बोधिता ॥ तथा ॥ वनजाऽऽवलीति ॥ वनजाऽऽवल्या कमलमालया विलसत् शोभमानं विशालं यद्वक्षःस्थलं तेन ललितः॥कीदृशान् व्रजाधिपव्रजसुंदरीजनव्रजान् ॥ विसृत्वरेति ॥ विसृत्वरः सर्वतः प्रसरणशीलो यो वदनद्युतिसमुच्चयो मुखकांतिसमूहस्तस्य यः परिचयः सार्वदिकः संबंधस्तेन पराजितस्ताराराजश्चंद्रो यैस्ते तथाविधान् ॥ तथा ॥ स्वांगेति ॥ स्वांऽगसंबंधियत्सौंदर्यं तदेव अपरिमितत्वात्तरंगमाली समुद्रस्तस्य यः तरंगाणां संचारिभावादिरूपाणां कदंबस्तस्य या भंगी विच्छित्तिविशेषः तस्यां यत्प्लवनं तरणं तेन विवशीकृतो विव्हलीकृतो ऽनंगो मदनो यैस्तथाविधान् ॥ स्वसौंदर्येणाऽनंगस्याऽपि मोहजनकान् किंपुनस्स्वांगानामित्यर्थः ॥ तथा ॥ अवयवेति ॥ स्फुटं ॥ नवनीतगोलकनिष्ठकोमलिमाऽधिककोमलिमशाल्यवयवानित्यर्थः ॥ एतेन स्निग्धत्वं गौरत्वं च ध्वनितं ॥ तथा ॥ भूषणेति॥ भूषणमणिगणसंबंधी यः प्रभाप्रकर्षः प्रभातिशयस्तेन द्विगुणिता द्वैगुण्यरूपाऽतिशयं प्रापिता या प्रभापरंपरा स्वाभाविकी स्वशरीरतेजःपरंपरा तया प्रकलितान् युक्तान्॥एतेन भूषणान्यंतराऽपि स्वाभाविकशोभाशालित्वान्मनोहरत्वं ध्वनितं ॥ तथा॥हृदिति ॥ हृत्सु हृदयेषु निहितानि अगस्त्यजन्मकारणानि घटाः सा-

ध्यवसानलक्षणया स्तनाः यैस्तेषां भावस्तत्ता तया हेतुना ॥ समयेति ॥ समयो यो विरहसमुद्रस्तस्य शोषणे समर्थानपि ॥ प्रीतीति ॥ प्रीतिरेव पारावारः समुद्रस्तस्य ललंत्यो विलसंत्यो या लहर्यो व्यभिचारिभावादिरूपास्तासां या लीला एकोपमर्दनपुरस्सरमपरलहर्युद्भवनरूपास्तासां यो लाभाऽतिशयस्तेनाऽऽर्द्रान् ॥ समुद्रशोषणसमर्थानपि समुद्रतरंगाऽऽर्द्रानित्येतावता विरोधः ॥ विरहतादात्म्यापन्नसमुद्रशोषकत्वेऽपि प्रीतितादात्म्यापन्नसमुद्रवर्द्धकत्वं न विरुद्धमिति परिहारः ॥ अत्र समुद्रशोषकत्वस्याऽगस्त्यएव सुप्रसिद्धत्वेऽपि कार्यस्य कारणानुरूपत्वनियमदर्शनात्तत्कारणे घटेऽपि समुद्रशोषकत्वसंभावनयेयमुक्तिः॥ कीदृशे वने॥ यमुनेति ॥ यमुनाया यदमृतं जलं तस्य मध्यवर्तिनो ये आवर्तगर्ताः जलभ्रमरंध्राणि तैर्नर्तितानि यानि कोकनदकुमुदकुवलयकल्हारेंदीवराणि कोकनदंरक्तोत्पलं कुमुदंश्वेतकमलं कुवलयंरात्रिविकासि कल्हारंसंध्याविकासि इंदीवरंनीलकमलं तेषां योनिकरः समूहस्तस्मान्निर्झरन् प्रवहन् यो मकरंदसंदोह स्सएव मादकत्वान्मधुरत्वाच्च आसव ऐक्षवं मद्यं तेन क्षीबा मत्ता ये षड्ंघ्रयो भ्रमरास्तेषां यो गणस्तस्य ये झंकारास्तेषां सहचराणि यानि कुंजपुंजमंडनभूतानां लतागृहसमूहभूषणभूतानां शिखंडिमंडलहंसकारंडवकोकिलाशुकसारिकाप्रभृतिपक्षिविशेषाणां मंजूनि सिंजितानि स्वस्वजातीयकेकादिशब्दरूपाणि तैर्मुखरितानि दिङ्मुखानि यस्मिन्नेवंभूते ॥ अत्र शिखंड्यादीनां भूषणत्वोक्त्या तच्छब्दस्य सिंजितत्वेन कथनं युक्तमेव ॥ तथा ॥ विशंकटेति॥बिशंकटं विस्तीर्णं यत्तटं यमुनातीरं तत्र वि-

कीर्णा स्वच्छा निर्मला अच्छमुक्तामणिप्रतिमा चाकचक्यादिमत्तया निर्मलमौक्तिकसदृशी या वालुका तस्यां मिलिता मिश्रतामापन्ना ये निशाकरकरप्रकराश्चंद्रकिरणसमूहास्तैरतिधवलिते ऽतिशुभ्रीकृते ॥ १ ॥

प० ॥ अनंगोऽपि स्वभूत्सांगः सिक्तायास्सीधुनाऽधुना ॥ वंशिकाया स्स्वनै रसम्यक् पितुरादेशकृध्रुवं ॥ १ ॥

अनंगइति॥अधुना सीधुना श्रीकृष्णाऽधराऽमृतेन सिक्ताया वंशिकायाः स्वयमचेतनाया अपि स्वनैर्ध्वनिभिः अनंगोऽपि स्वतोऽगरहितोऽपि हियस्मात् सांऽगः अभूत् ॥ सांऽगवत्कार्यकारीजात इति अथवा वंशध्वनिश्रवणसमकालमेव गोपिकानामंगेषु प्रादुर्भूतत्वात्तदंगैः सांगो जात इत्यर्थः ॥ तत्तस्माद्धेतोः ध्रुवं निश्चितं पितुः श्रीकृष्णस्य सम्यक् आदेशकृत् आज्ञाकारीच अभूत् ॥ वंशिकाध्वनिभिरुज्जीवितो मदनो झटिति गोपीनां शरीरं प्रविश्य भगवत्समीपं गंतुं ताः प्रेरितवानित्येव पितुराज्ञाकरणं तस्येति भावः ॥ यद्वा हि यस्मात्पितुरादेशकृत् भगवत्समीपे शीघ्रगमनार्थं गोपिकाप्रेरणेन श्रीकृष्णाऽऽज्ञानुवर्ती तस्माद्धेतोः स्वयमनंगोऽपि सीधुना सिक्ताया वंशिकायाः स्वनैः सांगः अभूत् ॥ पितुः श्रीकृष्णस्याऽऽज्ञाकरणजन्यपुण्येन अंगहीनोऽपि सांऽगो जात इति भावः ॥ १ ॥

ग० ॥ ततस्तच्छ्रवणसंजाततदुद्रेकाऽतिरेकविवशीभूताशयाः सौंदर्यसंपत्स्मयवशादिव विपर्य

ग्धृतांऽबरभूषाविशेषितदेहद्युतयः कृष्णावेशितमतयः सवित्रभ्रातृकमित्रप्रभृतिकृतरोधसेतुतिरस्करणमहानद्यः सद्यः सकामा अपि गृहे निष्कामा वामाअपि रासोत्सवकेलिषु दक्षिणास्तत्क्षणं सर्वलक्षितोद्यमा अपि परस्परमलक्षितोद्यमाः सर्वा अपि समा व्रजवध्वस्त्यक्तसाध्वसा माधवदर्शनायाऽध्वनि गृहाद्बहिर्निश्चक्रमुः ॥ २ ॥

ततइति ॥ ततो वेणुध्वनिश्रवणानंतरं व्रजवध्वस्त्यक्तसाध्वसास्त्यक्तभयाः सद्यः माधवदर्शनाय श्रीकृष्णं द्रष्टुं ॥ तुमर्थाच्चेति चतुर्थी॥गृहाद्बहिरध्वानि मार्गे यद्वा ध्वनिरहितं परस्परमाकारणादिशब्दरहितं यथास्यात्तथेति क्रियाविशेषणं ॥ आजग्मुरन्योन्यमलक्षितोद्यमा इति शुकोक्तेः ॥ यद्वा अध्वानि मार्गे त्यक्तसाध्वसा इत्यन्वयः ॥ निश्चक्रमुः ॥ कीदृश्यो व्रजवध्वः ॥ तदिति ॥ तस्य वेणुध्वनेर्यच्छ्रवणं तेन संजातो यस्तस्य कामस्योद्रेक आविर्भावस्तस्याऽतिरेक आधिक्यं तेन विवशीभूताः अस्वाधीनीभूता आशया अंतःकरणानि यासां ताः ॥ तथा ॥ सौंदर्येति॥सौंदर्यसंपदो यः स्मयो गर्वस्तस्य वशादाधीनत्वादिवेत्युत्प्रेक्षा ॥ विपर्यगिति ॥ विपर्यक् विपरीतं यथातथा धृता या अंबरभूषाः वस्त्राऽऽभरणानि तैर्विशेषिता देहद्युतयो यासां ताः ॥ विलक्षणसौंदर्यवतीनामस्माकं कथमपि धृतैर्भूषणादिभिः शोभैवेति बुद्ध्येव विपरीतधृतैरपि तैर्विशिष्टद्युतिशालिदेहा इत्यर्थः ॥ तथा ॥ कृष्णे आसमंताद्वेशिता निवेशिता मतयो याभिस्ताः ॥ अतएव ॥ स-

विचित्रिति ॥ सवितारः पितरः भ्रातरो बंधवः कमितारः पतयः एतेषां द्वंद्वे एते प्रभृतयो येषां तैः कृतो यो रोधः प्रतिबंधः स एव सेतुस्तस्य तिरस्करणे महानद्यः तत्सदृश्यः ॥ महानद्यो हि प्रवृद्धेन स्वप्रवाहेण सेतुभंजनं कुर्वंतीति प्रसिद्धं तथेमा अपि कामप्रवाहप्रवृद्ध्या पित्रादिकृतं निवारणं नगणयंति स्मेत्यर्थः ॥ तथा ॥ सद्यइति ॥ सद्यस्तत्कालं वेणुध्वनिश्रवणसमकालमेवेति यावत् ॥ सकामा अपि कामसहिता अपि गृहे विषये निष्कामाः कामरहिता इति विरोधः ॥ परिहारस्तु गृहविषये गृहेत्युपलक्षणं गृहादिविषये निष्कामाः भगवदेकतानमनस्कत्वेन गृहादिविषयकाऽभिलाषशून्याः ॥ तथा ॥ वामाः सुंदर्यः अपि पुनः रासोत्सवकेलिषु दक्षिणाः रासोत्सवक्रीडासु कुशलाः ॥ वामानां सव्यानां दक्षिणात्वमिति विरोधः ॥ उक्तार्थेन परिहारः ॥ तथा ॥ तत्क्षणमिति ॥ गमनसमये सर्वैर्लक्षितोद्यमा ज्ञातोद्योगाः ॥ सर्वलक्षितोद्यमा अपि अलक्षितोद्यमा इति विरोधः ॥ परिहारस्तु परस्परमन्योन्यमलक्षित उद्यमो ऽन्योऽन्याव्हानादियत्नो यासां ता इति ॥ वंशीरवश्रवणमात्रेण विवशाः सत्योऽन्योऽन्यबोधनाऽननुसंधानेनैव निर्गंतुमुद्यता इति भावः ॥ तथा ॥ सर्वाइति ॥ सर्वो विष्णुः सोऽस्यासां रंतव्यत्वेनेति सर्वाः ॥ अर्श आद्यच् ॥ एवंविधा अपि समाः मया लक्ष्म्या सहिताः समाः स्वयं विष्णुरूपा इति विरोधाभासः ॥ परिहारस्तु सर्वाः संपूर्णाः समाः रूपादिना परस्परं तुल्याः यद्वा सर्वासां श्रुतिरूपत्वेन गौणमुख्यभावाऽभावात् तुल्यरूपाः ॥ २ ॥

**प० ॥ चलनरभसवल्गत्पीनरम्योत्कुचास्ता रुचि
रवरसुचंचन्नूपुराद्युत्स्वनैस्तैः ॥ कृतमुखरतराध्वास्तं
मुदा गोकुलेंदुं मदनदमनदक्षं प्रापुरानंदसांद्रं ॥ २ ॥**

चलनेति॥ता गोप्यः तं लोकवेदप्रसिद्धं गोकुलेंदुं गोकुलस्येंदुरिव गोकुलेंदुःआल्हादजनकत्वात् एवंविधं श्रीकृष्णं मुदा हर्षेण प्रापुः॥ मुदेत्यनेन कृष्णदर्शनौत्सुक्यान्मार्गे गमनप्रयुक्तश्रमाऽपरिज्ञानं सूचितं ॥ कीदृश्यो गोप्यः ॥चलनरभसेति॥चलनस्य यो रभसो वेगः ॥ रभसोवे गहर्षयोरिति मेदिनीकोशात् ॥ तेन वल्गंतश्चलंतः पीनाः पुष्टाः रम्या रमणीया उन्नताः कुचा यासां तास्तथाविधाः ॥ तथा ॥ रुचिरेत्यादि ॥ तैः प्रसिद्धैः रुचिरवराः अतिरुचिराः सुचंचंतः सुष्ठु प्रकाशमाना ये नूपुरादयस्तेषां ये उत्स्वनाः उत्कृष्टध्वनयस्तैः ॥ कृतेति ॥ कृतः मुखरतरः अध्वा मार्गो याभिस्ताः ॥ डावुभाभ्यामन्यतरस्यामिति डाप् ॥ कीदृशं गोकुलेंदुं ॥ मदनदमने स्वकीयरूपसंपत्या कामदमने दक्षं ॥ तथा ॥ आनंदसांद्रं आनंदघनं ॥ मालिनी वृत्तं ॥ २ ॥

**दृष्ट्वाऽऽगतं व्रजसुयौवतमाह कृष्णो लीलेक्षणो
न्मथितमानसमात्मपार्श्वे ॥ मंदस्मितप्रसृतदंतरु
चिप्रमिश्रशोणाधरच्छवितिरस्कृतचंद्र इत्थं ॥ ३ ॥**

दृष्ट्वेति ॥ कृष्णः व्रजसुयौवतं व्रजसंबंधिशोभनयुवतिसमूहं ॥आत्मपार्श्वमागतं दृष्ट्वा इत्थं वक्ष्यमाणप्रकारेणाह ॥ कीदृशः कृष्णः ॥ मंदस्मितेति॥मंदस्मितेन प्रसृता या दंतानां रुचिः प्रभा तया प्रकर्षेण मिश्रा या शोणाऽधरच्छविस्तया तिरस्कृतश्चंद्रो ऽर्था-

द्वुदयकालिको येनैवंविधः ॥ इहाऽधरस्य स्मितदंतरुच्योः संपर्केण श्वेतिमबाहुल्यात्स्वाभाविकारुणिम्ना चौदयिकचंद्रतिरस्कर्तृत्वं युक्तमिति भावः ॥ एतेन मंदस्मितपूर्वकभाषणेन तासामभिप्रायपरीक्षणमेवाऽभिप्रेतं न निवर्तनमिति सूचितं ॥ कीदृशं व्रजसुयौवतं ॥ लीलेक्षणेति ॥ लीलाविशिष्टं यदीक्षणं कटाक्षादिपूर्वकमवलोकनं तेनोन्मथितं मानसं अर्थाद्भगवतो येनैवंविधं ॥ अथवा इदं क्रियाविशेषणं॥ लीलेक्षणोन्मथितमानसं यथा स्यात्तथा ऽऽहेत्यन्वयः ॥ अस्मिन्पक्षे लीलेक्षणं भगवतः मानसं च गोपीनां ॥वसंततिलका वृत्तं ॥ ३ ॥

शृणुत ननु सुचांद्रैश्चुंबितं तैः कराग्रैर्नलिनविटपिपुष्पोत्थै स्सुगंधै स्सुसांद्रम् ॥ पुलिनरुचिररेणुच्छद्मना स्मेरयुक्तं विपुलवनमहो वै दृष्टमेतत् प्रियाः किं ॥ ४॥

कृष्णो यदुक्तवांस्तदाह॥शृणुतेति॥अहो इति संबोधने॥अहो प्रियाः हे गोप्यः यूयं शृणुत ननु अर्थान्मदुक्तं शृणुतैव॥अवधारणार्थकननुशब्देन मदुक्तश्रवणे ऽनास्था न विधेयेति सूचितं॥ यद्वा नन्वित्यनुनये युष्माभिरेतद्विपुलवनं विशालमरण्यं दृष्टं किं॥कीदृशं ॥ तैर्जगदाल्हादकत्वेन प्रसिद्धैः सुचांद्रैः शोभनैश्चंद्रसंबंधिभिः कराग्रैश्चुंबितं ॥ कराणां घनस्पर्शे हि मालिन्योत्पत्त्या शोभावैकल्यं स्यादतः सुष्ठूक्तं कराग्रैरिति ॥ तथा ॥ नलिनेत्यादि ॥ नलिनानि कमलानि विटपिनां वृक्षाणां पुष्पाणि च तदुत्थैस्तदुत्पन्नैः सुगंधैःसुसांद्रं॥ सुसांद्रेत्यत्र सुशब्देन नित्यमीदृग्गंधस्य सत्ता सूचिता ॥ एताभ्यां विशेषणाभ्या मुपलक्षणतया यावद्द्वीपकसामग्रीविशिष्टत्वं बोधितं ॥ तथा ॥ पुलिनेति ॥ वै निश्चयेन पुलिनसंबंधिसुंदररेणुमिषेण स्मेरयुक्तं हास्ययुक्तं ॥ अनेन स्वगृहादिपरित्यागपूर्वकं निशायां भवतीनामागमनं दृष्ट्वा वनमप्येतद्युष्मान्हसतीति सूचितं ॥ मालिनी वृत्तं ॥ ४ ॥

घोरा पशुव्रातनिषेवणेन रात्रिर्वनं चेति तथा प्रयांतु॥ वेश्मानि मद्दर्शनपूर्णकामाः पश्यंति मार्गं पतयो हि वामाः॥ ५॥

घोरेति ॥ हेवामाः भवत्यइतिशेषः पशुव्रातनिषेवणेन क्रूरव्याघ्रादिसत्वसमूहानां निषेवणेन रात्रिर्घोरा भयानिका वनं च तथा भयानकं इति हेतोः वेश्मानि स्वगृहाणि प्रयांतु ॥ गृहगमने कारणांतरमाह ॥ पश्यंतीति ॥ हि यतः पतयः अर्थाद्युष्माकं भर्तारः मार्गं पश्यंति ॥ ननु तर्ह्यस्माभिरागत्य किमभीष्टं संपादितमित्याशंकानिवर्तनाय तासां विशेषणमाह ॥ मदिति ॥ स्पष्टं ॥ एतावतैव भवतीनामागमनप्रयोजनसिद्धिर्जातेति भावः ॥ इंद्रवज्रा वृत्तं ॥ ५ ॥

ग० ॥ एवं विप्रियमिव प्रेष्ठवदनसुधारश्मिनिःसृतवचनोच्चयमाश्रुत्य विषण्णमनसो ग्लपितलपनशुष्यत्सीधुशुम्भिताधरबिंबा दंतद्युत्यधरितदाडिमबीजनिकुरंबाः प्रस्वेदपृषदाकुलैर्मुखैरमंदमकरंदभरितारऽविंदसंदोहं तिरस्कुर्वत्यश्चरणतरुणा

ऽर्णोजनखवसुवसूच्चयेन वसुमतीमपि वसुमतीं कुर्वत्यस्तैस्तामुल्लिखंत्यो नयनेंदीवरेभ्योंऽजनमसृणिताऽश्रुस्रोतश्छलेन शृंगाररसमिव वर्षंत्यस्तेन कुचकुड्मलेभ्यो घुसृणांगरागपंकमपि क्षालयंत्यस्सजातीयवात्सल्यादिव करकमलैः प्रमृष्टनेत्रशतपत्राः शिथिलितललितगात्रा ईषन्मंदाक्षमंदाक्ष्यो मृगाक्ष्यो मंदाक्षरं तत्क्षणमिदमूचुः॥ ३॥

एवमिति॥एवं पूर्वोक्तप्रकारेण ॥ प्रेष्ठेति ॥ प्रेष्ठस्य प्रियतमस्य श्रीकृष्णस्य यद्वदनं तदेव सुधारश्मिश्चंद्रस्तस्मान्निःसृतो यो वचनोच्चयस्तं विप्रियमिव ॥ तासां प्रेमदार्ढ्यार्थमुच्चारितत्वेन परिणामरमणीयत्वादिवशब्दप्रयोगः ॥ आश्रुत्य श्रुत्वा तत्क्षणं विषण्णमनसः खिन्नांतःकरणाः मृगाक्ष्यो गोप्यः मंदाक्षरं लज्जादिवशादल्पस्वरोच्चारिताक्षरं यथा स्यात्तथा इदं वक्ष्यमाणमूचुः ॥ कीदृश्योमृगाक्ष्यः॥ ग्लपितेति॥ ग्लपितानि ग्लानिं प्राप्तानि लपनानि मुखानियासां ताः शुष्यत्सीधु अमृतं येषु तानि शुष्यत्सीधूनि अतएवशुभ्रितानि अधरबिंबानि यासां ताःग्लपितलपनाश्च ताः शुष्यत्सीधुशुभ्रिताधरबिंबाश्चैवंविधाः ॥ तथा ॥ दंतद्युतीति ॥ दंतद्युत्या अधरितास्तिरस्कृता दाडिमबीजानां निकुरंबाः समूहा याभिस्ताः अधराऽरुणिमतांबूलादिसंपर्कादिवमुक्तिः ॥ तथा ॥ प्रस्वेदेति ॥ प्रस्वेदस्य यानि पृषंति बिंदवस्तैराकुलानि व्याप्तानि तथाविधैर्मुखैः अमंदमकरंदेति ॥ अनल्पमकरंदपूरितकमलसमूहं तिरस्कुर्वत्यः ॥ तथा ॥ चरणेति ॥ चरणास्तरुणाऽर्णोजानीव तरुणकमलानीवेति

चरणतरुणाऽर्णोजानि कमलसदृशाश्चरणास्तत्संबंधिनो नखा एव वसूनि मणयस्तेषां ये वसवः किरणास्तेषां य उच्चयः समूहस्तेन॥ स्वयं वसुमतीमपि वसुमतीं वसवो रुचः संति यस्यां सा वसुमती तां कांतिमतीं कुर्वत्यः॥वसुर्ह्रदेऽग्नौ रश्मौ च वसु तोये धने मणावितिविश्वः॥वसुर्ना देवभेदाऽग्निभायोक्त्रबकराजस्वियिति मेदिनी च॥ तथा ॥ तैरिति ॥ तैश्चरणनखैस्तां पृथ्वीमुल्लिखंत्यः ॥ तथा॥नयनेंदीवरेभ्यः ॥ अंजनेति ॥ अंजनेन कज्जलेन मसृणितं मिश्रं यदश्रुस्रोतः अश्रुप्रवाहस्तच्छलेन तन्मिषेण शृंगाररसमिव वर्षंत्यः शृंगाररसस्य कृष्णवर्णत्वं रसशास्त्रे प्रसिद्धं ॥ तथा ॥ तेनेति ॥ अश्रुप्रवाहेण कुचकुड्मलेभ्यः सकाशात् ॥ घुसृणेति ॥ घुसृणं कुंकुमं ॥ काश्मीरजन्म घुसृणं वर्णं लोहितचंदनं ॥ बाल्हीकं कुंकुममिति हैमः ॥ तस्य योंऽगरागपंकस्तमपि क्षालयंत्यः ॥ एतेनाऽश्रुबाहुल्यं सूचितं ॥ अन्यथा क्षालनानुपपत्तेः ॥ तथा ॥ सजातीयेति ॥ करकमलैः कर्तृभिः सजातीयवात्सल्यादिव प्रमृष्टानि नेत्रशतपत्राणि नयनकुशेशयानि यासां ताः ॥ करनेत्रयोः कमलतादात्म्येन साजात्यं ॥ तथा ॥ शिथिलितेति ॥ शिथिलितानि ललितानि रमणीयानिचगात्राणि यासां ताः॥अत्र शैथिल्येऽपि लालित्योक्त्या तासांस्वभावरमणीयत्वस्याऽव्यभिचारित्वं सूचितं॥तथा॥ ईषदिति॥ ईषत् मंदाक्षेण किंचिल्लज्जया मंदानि स्वकार्यकरणे अपटूनि अक्षीणि यासांताः॥मंदाक्षं ह्री त्रपा व्रीडा॥मूढाल्पाऽपटुनिर्भाग्या मंदाः स्युरिति चाऽमरः॥लज्जा चाऽत्र एतत्कृतवेणुरवश्रवणादस्यरमणाभिप्रायमवगत्य निःशंकतया ऽऽगतवतीष्विदानीमीदृशवचनरचनाऽनुमीयमानाऽन्यादृशां ऽऽतराभिप्रायेणाऽनेन स्वस्य साधुत्वं

प्रकाशयता सोपहासमस्मासु व्यभिचारवत्वमारोपितमिति विचार-प्रयुक्ता लज्जा ॥ तस्यां च पूर्वं भगवद्दत्तवरानुरोधेन तादृशविश्वा-सदार्ढ्यादीषत्वम् ॥ ३ ॥

प० ॥ प्रेष्ठस्य ते मुखसुधांऽशुसमुत्थिता वागस्मन्मनोरथतरुग्लपनोद्यताऽभूत् ॥ चित्रं तदेव ननु वस्तुनिसर्गधर्मो यद्वैपरीत्यमगमद्वदतां वरिष्ठ ॥ ॥ ६ ॥

यदूचुस्तदाह॥प्रेष्ठस्येति॥प्रेष्ठस्य प्रियतमस्य तेतव॥मुखेति॥मुखमेव सुधांशुश्चंद्रस्तस्मात्समुत्थिता वाक्॥ अस्मदिति॥ अस्माकं ये मनोरथाः अर्थाद्भवता समं रमणविषयकास्तएव तरवो वृक्षास्तेषां यत् ग्लपनं ग्लानिकरणं तद्विषये उद्यता उद्युक्ता अभूत् अत्र मनोरथानां वैराग्यादिव्यभिचारिभावैरुच्छिद्यमानत्वेऽपि पुनःपुनः स्वतएव प्ररोहशालित्वेन तरुतादात्म्यं युज्यतएव॥ तदेव चित्रं वैचित्र्यमेव हेतुप्रदर्शनेन द्रढयति ॥ नन्विति ॥ यद्यस्माद्धेतोः ॥ नन्वितिसंबोधने ॥ हेवदतां वरिष्ठ वस्तुनिसर्गधर्मः वस्तुस्वभावसिद्धो धर्मः वैपरीत्यं अगमत् ॥ अयंभावः ॥ मुखस्य सुधांशुतादात्म्ये तन्निःसृताया वाचो ऽर्थादमृतरूपत्वं तथाच चंद्रनिष्पन्नसुधाया वृक्षाणां जीवनकरणं स्वाभाविकोधर्मः ओषधीशत्वात्सुधांशोः इदानीं च प्रियतमस्य वदतां वरिष्ठस्याऽपि ते मुखतादात्म्यापन्नसुधांशुनिःसृतवागमृतेनाऽस्मन्मनोरथाख्यवृक्षग्लपने स स्वाभाविको वस्तुधर्मो विपरीतो जात इत्याश्चर्यमिति ॥ वसंततिलका वृत्तं ॥ ६ ॥

हरिरित्यभिधानं ते युक्तं मनसाऽनुभूयते भूयः॥ त्वत्प्रीतिपाशबद्धा व्रजं व्रजामः कथं व्रजेश वद ॥ ७॥

किंच त्वया गंतव्यमित्युक्तेऽपि वयं गंतुमसमर्था इत्याहुः ॥ हरिरिति॥हे व्रजेश श्रीकृष्ण मनसा कर्त्रा अर्थादस्माकं ते हरिरिति अभिधानं नाम युक्तं हरतीति हरिरित्यर्थेन संगतं भूयो बहुतरं अनुभूयते ॥ एवंच वंशीवादनपुरःसरमस्मन्मनोहरणाद्धृतमनस्काभिरस्माभिर्गंतुं नशक्यते इति भावः ॥ एवं तर्हि मनो मय्येव निवेश्य तनुमात्रेण गृहं गंतव्यमिति चेत्तदपि न घटत इत्याहुः ॥ त्वदिति ॥ वयमिति शेषः त्वत्प्रीतिपाशबद्धाः वयं व्रजं कथं व्रजाम इति वद ॥ नहि बद्धेन मोचनं विनाऽन्यत्र गंतुं शक्यते इति भावः ॥ व्रजेशेति संबोधनेन व्रजेशितुस्तवाऽत्र स्थितौ सत्यामस्माभिस्तत्र गत्वा किं कर्तव्यं ॥ किंच ॥ व्रजंतीति व्रजा गमनकर्तारस्तेषामीशो व्रजेश इति व्युत्पत्त्या गमनपरिश्रमाऽभिज्ञेन त्वया वक्तव्यमस्माभिरेतावत्पर्यंतमागत्य श्रांताभिः कथं गंतव्यमितीति च ध्वनितं ॥ ७ ॥

त्वत्पादपंकजमरंदमिलिंद एतच्चेतश्चलं तदपि नो चलितुं क्षमं तत् ॥ किंच त्वदीयवदनामलसारसोत्थसीधुप्रलुब्धमधुना समभूद्व्रजेश ॥ ८ ॥

त्वदिति ॥हे व्रजेश यद्यपि एतदस्मत्संबंधि चेतः अंतःकरणं चलं स्वभावात् चंचलमेव भवति तदपि तथापि ॥ त्वदिति ॥ तव यत्पादपंकजं चरणकमलं तस्मिन् विषये मिलिंदोभ्रमरभूतं अस्ति अ-

तः उच्चलितुं गंतुं क्षमं समर्थं न॥मकरंदलोलुपस्य भ्रमरस्य मकरंदप-
रित्यागेनाऽन्यत्र गमनमसंभावितं प्रत्युत उत्तरोत्तराधिकनव्यनव्य-
मरंदलोलुपतया स तत्रैव तिष्ठति तद्वदेतदस्मन्मन इति भावः॥तदे-
वाह॥किंचेति॥तत् भ्रमरतादात्म्यापन्नमस्मच्चेतः अधुना॥त्वदीयेति॥
त्वदीयं त्वत्संबंधि वदनमेवाऽमलं निर्दोषं सारसं सरसीरुहं तस्मादुत्थं
उत्पन्नं यत्सीधु अर्थात्त्वदधराऽमृतं तद्विषये प्रकर्षेण लुब्धं समभूत्॥
तथा च त्वदधराऽमृतलुब्धमेतत्तल्लाभमेवाऽऽकांक्षति नतु गमनमि
ति भावः॥ अत्र पुनरपि व्रजेशपदोक्त्या सर्वस्याऽपि व्रजस्य त्व-
मेवैकः पतिरीशत्वाद्रक्षकश्चेति बोधनात् पतयो मार्गं पश्यंतीति
रात्रिर्वने भयंकरेतिच पूर्वोक्तं गृहगमने कारणद्वयमपि दत्तोत्तरं
वेदितव्यं॥ वसंततिलका वृत्तं॥ ८॥

**चांद्री सुधाऽप्यधरिता ऽधरसीधुना ते तस्माद्धरां
परिविहाय गता ऽगुणा सा॥ नोचेत्कुतोऽमृतनि
धिः कलया क्षयिष्णुस्तत्पोषितौषधिचयोऽधरवा
रिकांक्षी॥ ९॥**

ननु मदधराऽमृते किमेतादृशं माहात्म्यं एतदपेक्षयाऽपि मधुरतर-
स्याऽमृतस्य चंद्रादौ विद्यमानत्वादिति चेत्तत्राऽऽहुः॥ चांद्रीति॥
हे श्रीकृष्ण चांद्री चंद्रसंबंधिनी या सुधा अमृतं साऽपि यतस्ते
ऽधरसीधुना ऽधरिता तिरस्कृता अतएव अगुणा सती स्वीयपोष-
कत्वादिगुणरहिता सती धरां पृथ्वीं विहाय गता आसीत्॥ लो-
केऽपि इतरपराभूतस्य गुणवतोऽपि गुणा नष्टप्राया भवंति इति

प्रसिद्धं॥ एवंसति चंद्रसंबंध्यमृतस्य पृथ्व्यामुपलंभाऽभावात्सत्य-
पि तस्मिंस्त्वदधराऽमृतपराभूते तस्मिंस्तादृङ्माधुर्यादिगुणाऽनुपलं-
भात् तद्विषये अस्मन्मनो लुब्धं न भवतीति भावः॥ इदमेव व्य-
तिरेकेण द्रढयति॥ नोचेदिति॥ पूर्वोक्तं नचेत् स्वयं अमृतनि-
धिरपि कुतो हेतोः कलया क्षयिष्णुः क्षयशीलः॥ तथा॥ तदि-
ति॥ तेन चंद्रेण पोषितो य ओषधिचय स्स कुतो हेतोः॥ अध-
रेति॥ अधरं धरासंबंधरहितं मेघसंबंधीति यावत् एवंविधं यत्
वारि उदकं तदाकांक्षति तच्छीलः अस्तीतिशेषः॥ तस्मात्त्वदधरा-
ऽमृतनिर्जितायाः सुधाया धरातो निर्गमनेन पोषकत्वादिगुणाऽ-
नुपलंभेन च चंद्रस्य प्रतिपक्षं क्षयशालित्वं तत्पोषितौषधीनां मे-
घोदकाऽऽकांक्षा च जायते॥ एवंचाऽचेतनानामप्योषधीनामधरा-
ऽमृताऽऽकांक्षा किमुत चेतनानामनुरक्तानामस्माकमिति भावः॥
वसंततिलका वृत्तं॥ ९॥

**अयि प्राणप्रेष्ठ किं बहुना॥ प०॥ हृदब्जं मद्गेहं
भवितुमुचितं नाऽन्यदिति सा हरेर्मत्वा लक्ष्मीर्व्यु
पगतवतीतत्किल तदा॥ सुगंभीरं दृष्ट्वा मुखशुभ
कलानाथमनिशं त्वदीयं संद्रष्टुं वसतिमकरोत्तत्त
टभुवि॥ १०॥**

किंचाऽतिचपलाऽपि लक्ष्मीरविच्छेदेन भवन्मुखचंद्रदर्शनार्थं नि-
रंतरं भवद्धृदयएव वसति का कथाऽस्माकमित्यलं बहूक्त्येत्याहुः॥
अयीति॥ स्पष्टं॥ हृदब्जमिति॥ हे श्रीकृष्ण सा जगद्विलक्षण-
रूपादिसंपद्विशिष्टत्वेनप्रसिद्धाऽपि लक्ष्मीर्हरेर्हृदब्जं हृदयसंबंधि

कमलं मद्गेहं मद्गृहं भवितुमुचितं अन्यन्नेति मत्वा किल निश्चित्य किल उपगतवती प्राप्ता सती तदा तस्मिन्समये तत्धृदब्जं सुगंभीरं अतिगहनं दृष्ट्वा त्वदीयं॥मुखेति॥मुखमेव शुभः कलंकित्वादिदोषराहित्येन शुभगुणविशिष्टः॥एतेन प्रसिद्धचंद्राद्वैलक्षण्यं सूचितं॥ एवंविधो यः कलानाथश्चंद्रस्तं अनिशं निरंतरं द्रष्टुं तत्तटभुवि तस्य हृदब्जस्य या तटभूः तदुपरितनो बहिर्भागो वक्षस्थलं तस्मिन् वसतिमकरोत् ॥ अतिगहनत्वात्धृदयांऽतर्वर्तिकमले स्थित्या भवन्मुखदर्शनं न भवेदित्यालोच्य तदुपरि हृदयभागे वासमकरोत् तथासति साक्षाद्भवन्मुखचंद्रदर्शनलाभे इदानीं जायमाने सति तमनादृत्याऽस्माभिः पदमप्येकं गंतुं कथं शक्येतेति भावः ॥ शिखरिणी वृत्तं ॥ १० ॥

तस्मात्त्वदंघ्रितरुणाऽरुणकंजयुग्ममुत्सृज्य किं व्रजमये वयमद्य यामः ॥ त्यक्त्वा प्रजास्वजनसद्मचयांस्त्वमस्मांस्तप्ता मुखोत्थसुधया कुरु तापशून्याः॥ ११ ॥

स्वपतिप्रभृतिसर्वोल्लंघनपुरःसरं सर्वभावेन त्वदधरसुधाशया आगता अस्मानकृतार्था मा विसृजेत्युपसंहरंति ॥ तस्मादिति॥अये श्रीकृष्ण यस्माद्धेतोः वयं ॥ त्यक्तेति ॥ त्यक्ताः प्रजाः पुत्रादयः स्वजनाः पित्रादयः सद्मचया गृहसमूहा गृहाणि चयाः सजातीयादिसमूहा वा याभिस्तास्तथाविधाः स्मः तस्माद्धेतोः ॥ त्वदिति ॥ तवांऽघ्रिरूपं तरुणं नव्यं अरुणं यत् कंजयुग्मं रक्तोत्पलयुगलं तदुत्सृज्य त्यक्त्वा अद्य व्रजं यामः किं अपितु नैवयामः ॥

तर्हि किं मया विधेयमिति चेत्तत्राऽऽहुः॥त्वमिति ॥ त्वं तप्ताः कामतप्ताः अस्मान्मुखोत्थसुधया अधरसुधया तापशून्याः कुरु ॥ वसंततिलका वृत्तं ॥ ११ ॥

ग० ॥ ततोऽसावीदृक्समुद्रिक्ताऽनुरागसमुद्राऽवगाहविस्मृतदेहाऽध्यासानां स्वाऽऽकांक्षाकृताभ्यासानां सर्वांगकलितानंगानुषंगानां गोपांगनानां रमणीयगद्गदाऽक्षरमणिश्रेणिं रसिकशिरोमणिस्स्वश्रोत्रसरणिसंचारिणीं विरचय्य॥ ४ ॥

ततइति ॥ रसिकशिरोमणिरसौ श्रीकृष्णः गोपांगनानां ॥ रमणीयेति ॥ रमणीया गद्गदा या अक्षरमणिश्रेणिस्तां॥ श्रोत्रेति॥श्रोत्रयोः कर्णयोर्या सरणिर्मार्गः तत्संचारिणीं विरचय्य श्रुत्वेति यावत्॥ अस्योत्तरश्लोकेऽन्वयः ॥ कीदृशीनां गोपांगनानां॥ईदृगिति ॥ ईदृक् पूर्वोक्तप्रकारेण समुद्रिक्तो वृद्धिं प्राप्तो योऽनुरागः प्रेम स एव समुद्रस्तस्मिन् यदवगाहनं तेन विस्मृतो देहाऽध्यासो याभिस्तास्तथाविधानां ॥ तथा॥स्वाऽऽकांक्षेति ॥ स्वस्मिन् श्रीकृष्णे विषये या आकांक्षा इच्छा तद्विषये कृताऽभ्यासानां ॥ निरंतरं श्रीकृष्णविषयकेच्छां कुर्वतीनामित्यर्थः ॥ तथा ॥ सर्वांगेति ॥ सर्वांगेषु कलितः अनंगाऽनुषंगो मदनसंबंधो यासां तास्तथाविधानां ॥ सर्वांगव्याप्तमदनानामित्यर्थः ॥ ४ ॥

प० ॥ स्मित्वाऽऽनंदसुधाऽब्धिरेष ससुखं गोपांऽगनाभिर्मुदा क्रीडामारभताऽतिसुंदरवरो रासाभि

धां तत्क्षणं॥पुष्प्यत्पुष्पपरागपूरितमरुत्सांद्रे सुवृंदा
वने चंद्राऽमंदगभस्तिमिश्रितसरिद्रेणूत्करैर्मंडिते॥
॥ १२ ॥

स्मित्वेति ॥ तत्क्षणं स्मित्वा हास्यं कृत्वा अतिसुंदरवरः आनंदसुधाऽब्धिरेष श्रीकृष्णः सुवृंदावने गोपांऽगनाभिः सह रासाभिधां- क्रीडां मुदा आरभत ॥ कीदृशे सुवृंदावने॥पुष्प्यदिति ॥ पुष्प्यति विकसंति यानि पुष्पाणि तेषां यः परागस्तेन पूरितो यो मरुद्वायुस्तेन सांद्रे निबिडे ॥ तथा ॥ चंद्रेति ॥ चंद्रस्याऽमंदा अनल्पा ये गभस्तयः किरणास्तैर्मिश्रिता ये सरित्संबंधिनोरेणूत्कराः सिकतासमूहास्तैः मंडितेऽलंकृते ॥ शार्दूलविक्रीडितं वृत्तं ॥ १२ ॥

दंताऽऽवलिद्युतिपराजितचंचलाभिः स्वास्येंदुनि
र्जितकलानिधिभिर्विहारम्॥कुर्वन् बभौ व्रजप
तिर्व्रजवासिनीभिस्तारागणैरिव वृतः परितः सु
धांशुः॥ १३॥

दंतावलीति॥व्रजवासिनीभिः सह विहारं कुर्वन् व्रजपतिः श्रीकृष्णः तारागणैर्नक्षत्रगणैःपरितो वेष्टितः सुधांशुश्चंद्र इव बभौ शुशुभे॥कीदृशीभिर्व्रजवासिनीभिः ॥ दंतावलीति॥दंतावलिद्युतिभिः दंतपंक्तिकांतिभिः पराजिता चंचला विद्युत् याभिस्ताभिः॥तथा॥ स्वेति ॥ कलंकादिराहित्येन शोभनो य आस्येंदुर्मुखचंद्रस्तेन निर्जितः कलानिधिश्चंद्रो याभिस्ताभिः ॥ वसंततिलका वृत्तं ॥ ॥ १३ ॥

नानाऽऽश्लेषसुखैः सुचुंबनचयैः क्ष्वेल्या सलीले
क्षणैः पीनोत्तुंगपयोधरक्षतभरैरुत्तंभयन्मन्मथं॥
रेमे रासविहारपूर्णरसिकः श्रीगोकुलेंदुः समं ताभि
र्वाद्यसुगीतनृत्यकलया तासां सुखं सांद्रयन्॥ १४॥

नानाऽऽश्लेषेति ॥ रासविहारपूर्णरसिकः रासविहारे रासक्रीडायां पूर्णो रसिकः श्रीगोकुलेंदुः श्रीगोकुलस्येंदुरिव आल्हादजनकत्वादिति श्रीगोकुलेंदुः श्रीकृष्णः ताभिर्गोपीभिः समं सह रेमे ॥ किं कुर्वन् नानाऽऽश्लेषसुखैः नानाऽनेकप्रकारा ये आश्लेषा आलिंगनानि तैर्यानि सुखानि तैः ॥ तथा ॥ सुचुंबनचयैः सुष्ठु शोभनानि यानि चुंबनानि तेषां चयैः ॥ तथा ॥ क्ष्वेल्या नर्मणा ॥ तथा॥ सलीलेक्षणैः सविलासाऽवलोकनैः ॥ तथा ॥ पीनेति ॥ पीनाः पुष्टा उत्तुंगा उन्नता ये पयोधराः स्तनास्तेषु यानि क्षतानि नखक्षतानि तेषां भरैः मन्मथं काममुत्तंभयन् वर्द्धयन् ॥ तथा ॥ तासां गोपीनां सुखं वाद्यसुगीतनृत्यकलया तौर्यत्रिकचातुर्येण सांद्रयन् निबिडीकुर्वन् ॥ शार्दूलविक्रीडितं वृत्तं ॥ १४ ॥

नृत्योत्सवे चलतरा वरहारयष्टिः स्पृष्ट्वा बभौ मु
खरितामिति रत्नकांचीं॥शून्ये स्थिता कथमियं
मणिजालयुक्तेत्येतत्समागतवती किल वेत्तुमत्र
॥ १५॥

नृत्योत्सवइति ॥ नृत्योत्सवे चलतरा अत्यंतचंचला तासामिति शेषः ॥ वरहारयष्टिः ॥ जात्यैकत्वादेकत्वं ॥ मुखरितां अर्थान्नृत्योत्सवेन वाचालितां रत्नकांचीं स्पृष्ट्वा इति बभौ ॥ इति कथमित्या-

कांक्षायामुखेक्षते ॥ इयं मणिजालयुक्ता कांची शून्ये आकाशे॥ गोपीमध्यस्याऽतिसूक्ष्मत्वेनाऽदृश्यत्वात्तस्य साध्यवसानलक्षणया आकाशवाचकशून्यपदेनोल्लेखः ॥ कथं स्थिता एतद्धेतुमत्र कांचीस्थाने समागतवती किलेति ॥ नहि शून्ये कस्याऽपि स्थितिः संभवति काच्यास्तु मणिजालयुक्तत्वेनाऽतिगुरुत्वान्नृत्यवशेनाऽतिचंचलत्वाच्च सुतरामाकाशे स्थित्यनुपपत्तिराशंकाबीजमितिभावः ननु कांच्याः श्रोण्यालंकारत्वेन मध्यदेशे तद्वर्णनमनुचितमितिचेन्न ॥ कुंडलस्यश्रवणाऽऽधारत्वेऽपि कपोलाऽलंकारत्ववत् कांच्या अपि मध्याऽऽधारत्वेऽपि श्रोण्यलंकारत्वस्याऽक्षतत्वात् ॥ कुंडलस्य कपोलाऽलंकारत्वमनर्घ्यराघवे कष्टा वेधव्यथा कष्टो नित्यमुद्वहनक्लमः ॥ श्रवणानामलंकारः कपोलस्य तु कुंडलमिति ॥ वसंततिलका वृत्तं ॥ १५ ॥

कष्टेनाऽष्टांऽगयोगेन न प्रापुर्योगिनश्चिरात् प्राप्ता स्तमंगतोऽनंगयोगेनाऽऽशु वयं परम् ॥ १६ ॥

अथ गोपीनां प्रेमदार्ढ्याय किंचित्कालमंतर्धानं भगवतो वदंस्तत्कारणभूतं तासां गर्वं वर्णयति॥कष्टमिति॥ योगिनः नित्यं योगाभ्यासशीलाः॥नित्ययोगे मत्वर्थीयः॥तेऽपि कष्टेन क्लेशसाध्येनाऽपि अष्टांगयोगेन अष्टावंगानि यस्य सोऽष्टांगः स चाऽसौ योगश्चाऽष्टांगयोगस्तेनाऽपि तत्राऽपि चिरात् चिरकालेनाऽपि यं भगवंतं न प्रापुः ॥ तदुक्तमेकादशस्कंधे भगवतैव ॥ न साधयति मां योगो न सांख्यं धर्म उद्धवेत्यादि ॥ चिरादित्यनेन जन्मांतरेऽपि भगवत्प्राप्तेर्दौर्लभ्यं सूचितं ॥ तं परमात्मानं श्रीकृष्णं प्रति वयं गोपस्त्रियोऽपि अंगतः अनेनैव शरीरेण ॥ सार्वविभक्तिकस्तसिः ॥ अनं-

गयोगेन कामसंबंधेन श्लेषेण यमाद्यंगरहितेनाऽपि योगेन आशु शीघ्रं ननु चिरात् प्राप्ताः स्मः एवंच योग्यपेक्षयाऽप्यस्माकं महती योग्यतेति भावः ॥ १६ ॥

दर्पकदर्पसुखंडनपंडित आज्ञाय तद्भरं तासु ॥ सोंऽतर्हितो बभूव त्वंतर्ध्यानस्य सिद्धये तासाम् ॥ ॥ १७ ॥

दर्पकेति ॥ दर्पकस्य कामस्य यो दर्पः सौंदर्यादिप्रयुक्तो गर्वस्तस्य यत्सुतरां खंडनं तद्विषये पंडितो निपुणः ॥ कामाऽधिकसौंदर्यशालीत्यर्थः ॥ कंदर्पो दर्पकोऽनंग इत्यमरः ॥ एतेन कामस्याऽपि यो गर्वनिर्वापकस्तस्याऽन्येषां सौंदर्यादिगर्वनिर्वापणं सुकरमिति सूचितं ॥ सः श्रीकृष्णः तासु गोपीषु वर्त्तमानं तद्भरं गर्वभरमाज्ञाय तासां गोपीनामंतर्ध्यानस्य सिद्धयेंऽतर्हितो बभूव ॥ हिरवधारणे ॥ सर्वदा दृग्गोचरत्वे अंतर्ध्यानं दृढं न भवतीति तत्सिद्धये अंतर्हित एवाऽभूदित्यर्थः ॥ १७ ॥

ग० ॥ ततो नेत्रचकोरचक्राऽऽनंददानमृगांके भगवति त्वरितमंतर्हितेंऽतराहिततद्विश्लेषक्लेशा व्रजविलासिन्यो विक्लवतामवापुः ॥ ५ ॥

ततइति ॥ नेत्रेति ॥नेत्राण्येव चकोरचक्रं चकोरमंडलं तस्याऽऽनंददाने मृगांकश्चंद्रस्तत्सदृश इत्यर्थः ॥ तस्मिन्नेवंविधे भगवति त्वरितं शीघ्रं अंतर्हिते अंतर्धानं प्राप्ते सति ॥ अंतरिति ॥ अंतः आहितः स्थापितः तस्य भगवतो विश्लेषप्रयुक्तो वियोगप्रयुक्तः क्लेशो याभिस्तास्तथाविधाः व्रजविलासिन्यो विक्लवतां विव्हलत्वं

अवापुः प्राप्तवत्यः ॥ त्वरितं अंतर्धानसमकालमेव विक्लवतामवापुरिति वा न्वयः ॥ ५ ॥

प० ॥ यत्प्रेमपूरपरिपूरितकृष्णसूनु स्सर्वाऽऽत्मता मगमदाशु तथा स्वयं नो ॥ तस्माद्विपृच्छ्य धरणी रुहजालमेतत्तद्वाक्यसीधु सुखतः श्रुतितः पिबा म ॥ १८ ॥

अथ गोपीनामुन्मादप्रयुक्तानामपि वृक्षादीन् प्रति प्रश्नानां किंचिद्विचारपूर्वकत्वं संभावयंस्तत्प्रश्नकरणं वर्णयति ॥ यदित्यादिद्वाभ्यां ॥ यस्य भगवतो यः प्रेमपूरस्तेन परिपूरितः परिपूर्णो यः कृष्णस्य सूनुः पुत्रः कामः अथच यस्मिन् भगवति विषये यः प्रेमपूरस्तेन परितः सर्वतः पूरितो यः कृष्णस्य वेदव्यासस्य सूनुः शुकः आशु शीघ्रं सर्वात्मतां सर्वशरीरव्यापकत्वं पक्षे जडवृक्षरूपेण व्यासायोत्तरदानात् सर्वरूपत्वं च अगमत् प्राप्तवान् ॥ तदुक्तं ॥ यं प्रव्रजंतमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव॥पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मीति ॥ स कृष्णः स्वयं तथा सर्वात्मताऽऽपन्नो नो इति काकुः अपितु सर्वात्मतापन्नएव तस्मादेतद्धरणीरुहजालं वृक्षसमूहं ॥ हरिणादीनामप्युपलक्षणमेतत् ॥ तं प्रति विपृच्छ्य विशेषेण पृष्ट्वा तद्वाक्यसीधु श्रीकृष्णतादात्म्यापन्नवृक्षनिःसृतवाक्याऽमृतं सुखतः सुखेन श्रुतितः श्रुतिभिः करणैः पिबाम सादरंशृणुम ॥ यदा कृष्णसूनुः सर्वात्मतामगमत्तदा स्वयं श्रीकृष्णोऽपि तथाभूतोऽस्त्येवे-

त्यस्माभिः पृच्छ्यमाना वृक्षास्तन्मयत्वेनोत्तरं दास्यंति तच्छ्रवणमात्रेणैव सुखमनुभवाम इति भावः ॥ वसंततिलका वृत्तं ॥ १८॥

इतीव संचिंत्य चिरं चिरंट्यश्चितोच्चयाऽऽचुंबित चित्तचम्वः॥ पप्रच्छुराराद्रुरुदुर्द्रुजालं त्यलं चलं त्यश्चरणैश्चलाशाः॥ १९ ॥

इतीवेति ॥ इति पूर्वोक्तप्रकारेण चिरं संचिंत्येवेत्युत्प्रेक्षा ॥ चितेति ॥ चितोच्चयेन चितासमूहेन चितासंतानेनेति यावत् आचुंबिताश्चित्तचम्वश्चित्तसेनाश्चित्तसमूहा इति यावत् यासां ताः चरणैश्चलंत्यो गच्छंत्यः चलाशाः चलाश्चंचला आशा रमणाऽभिलाषा यासां ताः ॥ अथवा चलास्तरला आशा दिशो यासां ताः दिग्भ्रमवत्यइत्यर्थः ॥ चिरंट्यो गोप्यः आरात्समीपवृत्ति द्रुजालं वृक्षसमूहं प्रति अलमत्यर्थं पप्रच्छुः तथा रुरुदुः ॥ उपजातिर्वृत्तं ॥ १९ ॥

भो भो नीप वनीपकान्निजमुखोत्थायाः सुधाया द्रुतं त्यक्त्वास्मान्क गतः स वंचकवरो जानीमहे नो वयम् ॥ वीरत्वत्सुमनोऽचितस्य पदवीमर्हस्यतः पृच्छतीर्वक्तुं रात्रितमश्छटानिबिडितेनानाद्रुजालैर्वने ॥ २० ॥

अस्मद्वस्त्रहरणवेलायां कदंबे एवाऽऽरूढत्वाद्भगवतस्तस्मिन् प्रीतिरिति बुध्या प्रथमतस्तमेव पृच्छंति ॥ भोइति ॥ भो भो नीप हे कदंब सः पूर्वमस्मद्वस्त्रहरणवेलाऽनुभूतवंचकत्वतया प्रसिद्धः वंच-

कवरः श्रीकृष्णः निजमुखोत्थायाः सुधाया वनीपकान्याचकान् तां याचमाना इत्यर्थः॥वनीपको याचनको मार्गणो याचकार्थिनावित्यमरात्॥अस्मान् द्रुतं त्यक्त्वा चिरंतनस्नेहपरिचयाद्यविगणनपूर्वकंपरित्यज्य वने क्व गत इति वयं नो जानीमहे ततो हेतोः हे वीर भगवदादृतत्वात् हेश्रेष्ठ॥ वीरो जिने श्रेष्ठे इति हैमात्॥नानाद्रुजालैर्हेतुभिः रात्रितमश्छटानिबिडिते रात्रिसंबंध्यंधकारघने ॥ चंद्रिकासत्वेऽपि निबिडवृक्षसमूहैरंधकारघने इत्यर्थः॥एवंविधे वने त्वत्सुमनोंऽचितस्य त्वत्कुसुमपूजितस्य श्लेषेण तव यत्सुष्ठु मनस्तेनांऽचितस्य ॥ अंचेः पूजायामिति निष्ठाया इट् ॥ तस्येति शेषः कृष्णस्य पदवीं मार्गं पृच्छंतीरस्मान्वक्तुमर्हसि ॥ शार्दूलविक्रीडितं वृत्तं ॥ २० ॥

तुलसिके रसिकेऽसि तदीयपत्सरसिजे शशिकां
तिनखैस्सुभे॥ उरसि चाऽसि विलासिशिरोमणेः
स्थितवतीति तदीयगतिं वद॥ २१ ॥

अथ भगवत्प्रियत्वात्तुलसीं पृच्छंति ॥ तुलसिकेइति ॥ हेरसिके ॥ एतेन विरहदुःखं त्वमेव जानासीति सूचितं ॥ हेतुलसिके त्वमितिशेषः शशिकांतिनखैः चंद्रसदृशकांतिमद्भिर्नखैः कृत्वा सुभे सुष्ठु भा प्रभा यस्य तस्मिन् ॥ स्युः प्रभा रुग्रुचिस्त्विड् भा भाश्छविद्युतिदीप्तय इत्यमरात् ॥ तदीयपत्सरसिजे असि ॥ एतेन भगवच्चरणसन्निहितत्वात्स्वच्छचित्तत्वं सूचितं ॥ सुभे इत्यनेन तद्दर्शनप्रतिबंधकांऽधकारनिवृत्तिः सूचिता ॥ चपरं विलासिशिरोमणेरुरसि वक्षःस्थले स्थितवती असि हाररूपेण सर्वदा तत्र वर्तसे

इत्यर्थः॥ एतेन भगवद्धृदयाऽभिप्रायज्ञत्वं विलासिशिरोमणेर्हृदयाऽऽलिंगनेन विलासिनीशिरोमणित्वं च सूचितं॥इति हेतोस्तदीयगतिं वद ॥ द्रुतविलंबितं वृत्तं ॥ द्रुतविलंबितमाह नभौ भरौ इति तल्लक्षणात् ॥ २१ ॥

अवने नवनीतहारिणो ऽये नवनीपच्छदपादचा
रिणो द्राक्॥वद हा पदवीं विहारिणो यत्तदती
व प्रथिता विसारिणोऽस्य॥ २२॥

अथ पृथ्व्यास्तत्प्रियपत्नीत्वं मनसि निधाय तां पृच्छंति॥अवनेइति ॥ अये अवने हेपृथ्वि यद्यस्मात्त्वमतीव प्रथिता ऽत्यंतविस्तृताऽसि तत्तस्मात् विसारिणः विशेषेण सरति गच्छति तच्छीलस्तस्य गमनशीलस्य ॥ तथा ॥ नवेति ॥ नवौ नूतनौ यौ नीपच्छदौ कदंबपत्रे तत्सदृशाभ्यां मृदुलाभ्यामित्यर्थः ॥ पादाभ्यां चरतीति तथाविधस्य ॥ एतेन मृदुचरणस्पर्शसुखितत्वं पृथिव्या ध्वनितं ॥ तथा ॥ नवनीतहारिणः ॥ अनेन चोरत्वाद्गूढस्थित्यभ्यासो ध्वनितः ॥ तथा ॥ विहारिणः विहारशीलस्य ॥ अनेन दक्षिणनायकत्वं ध्वनितं ॥ तेन चाऽन्याभिः सह विहारार्थं स्थलांतरे गमनसंभावनाऽपि सूचिता ॥ अस्य श्रीकृष्णस्य पदवीं वै निश्चयेन द्राक् शीघ्रं वद हा इति खेदे ॥ त्वयि सर्वदा संचरन् श्रीकृष्णस्त्वया ज्ञायतएवेति कुत्राऽस्तीति वदेति भावः ॥ औपच्छंदसिकं वृत्तं ॥ विषमे ससजा गुरू अनोजे स्भरयाश्छंदसिकं तदौपपूर्वमिति तल्लक्षणात् ॥ २२ ॥

नाम्नाऽस्यशोकस्त्वमत स्सशोका मुहुर्विशोकाः

कुरु वृक्षवर्य ॥ नो चेत्सशोकः प्रथितो भविष्यस्ये तद्विनिंद्यं किल लब्धकीर्तेः ॥ २३ ॥

अथाऽशोक इति नाम्नोऽर्थविचारेणैतस्मिन् शोकनिवर्त्तकत्वं मत्वा तं प्रति शोकनिवारणं प्रार्थयंते ॥ नाम्नेति ॥ हेवृक्षवर्य यतस्त्वं नाम्ना अशोकः न विद्यते शोको यस्येत्येवंविधोऽसि अतः भगवद्वियोगात् सशोकाः अस्मान् विशोकाः भगवत्स्थितिस्थलनिर्देशेन विगतशोकाः कुरु नोचेदेवं न करिष्यसि चेत् सशोक इति प्रथितः प्रख्यातो भविष्यसि ॥ नचाऽत्रेष्टापत्तिर्मंतव्या ॥ पूर्वं सर्वत्र संपादितयशस्कस्य पश्चादपयशःप्रसृतेरतिनिंद्यत्वादित्याशयेनाऽऽहुः ॥ एतदिति ॥ संभावितस्य चाऽकीर्तिर्मरणादतिरिच्यते इति प्रसिद्धेरिति भावः ॥ उपजातिर्वृत्तं ॥ २३ ॥

नाम्ना स्वभावाद्वपुषाऽस्य नित्यं कृष्णस्य नूनं हृदयंगमस्य ॥ सुचंचलाक्ष्याकथयस्व मार्गं यत् कृष्णसारीति निसर्गतस्त्वम् ॥ २४ ॥

अथ मार्गे कृष्णसारीं दृष्ट्वा कृष्ण स्सारो यस्याः सा कृष्णसारीत्यन्वर्थतां तस्या नाम्नि मत्वा तां पृच्छंति ॥ नाम्नेति ॥ हे सुचंचलाक्षि अत्यंतचपलनेत्रे यद्यस्मात्त्वं निसर्गतः स्वभावेन कृष्णसारी-कृष्णः सारो बलं धनं वा यस्यास्सा तथाविधा असि ॥ सारो बले स्थिरांशे च मज्ज्ञि पुंसि जले धने ॥ न्याय्ये क्लीबं त्रिषु वरे इति मेदिनीकोशात् ॥ इति हेतोः नाम्ना संज्ञया कृष्णस्य स्वभावात् कर्षतीति कृष्ण इति व्युत्पत्त्या कर्षणकर्तुः ॥ अनुभूतमेतदस्माभिर्मुरलीनादाऽऽकृष्टाभिः ॥ वपुषा शरीरेण कृष्णस्य कृष्णवर्णस्य ॥

उभयत्र प्रकृत्यादित्वात्तृतीया ॥ नित्यं हृदयंगमस्य हृदयंगच्छतीति हृदयंगमस्तस्य दर्शनमात्रेण हृदयप्रविष्टस्य ॥ प्रियवशेवदः खजिति सूत्रे गमेः सुपि वाच्य इति वार्तिकेन खच् ॥ अस्य प्रेष्ठस्य मार्गं आकथयस्व ईषदपि ब्रूहि ॥ सुचंचलाक्षीतिसंबोधनाल्लोचने सर्वतश्चंचलयंत्यास्तव क्वचिद्दर्शनमवश्यमेव जातं स्यादिति संभाव्यते इति सूचितं ॥ उपजातिर्वृत्तं ॥ २४ ॥

रसालसालौ सरलप्रियालौ पुन्नागनागौ बकुलाऽर्जुनौ भोः ॥ सर्वे द्रुमा नः प्रवदंतु शीघ्रं वर्त्म व्रजेशस्य तदीयदेश्याः ॥ २५ ॥

रसालेति ॥ भोः रसालसालौ रसाल आम्रः सालः सालाख्यो वृक्षभेदः ॥ भोः सरलप्रियालौ सरलो देवदारुभेदः प्रियालश्चाराख्यो वृक्षभेदः ॥ भोः पुन्नागनागौ पुन्नाग उंडणाख्यो वृक्षः नागोनागकेसराख्योवृक्षः ॥ भोः बकुलाऽर्जुनौ प्रसिद्धौ ॥ यूयं सर्वे द्रुमाः यतस्तदीयदेश्याः श्रीकृष्णसंबंधिदेशभवाः अतो व्रजेशस्य वर्त्म शीघ्रं नोऽस्मान् प्रवदंतु ब्रुवंतु ॥ व्रजंतीति व्रजा गमनकर्त्तारस्तेषामीश इति व्युत्पत्त्या निरंतरगमनशीलस्य प्रवृत्तिश्रमवशात् गंतुमसमर्था वयं न जानीम इति तद्देशभवा भवंतएव वदंत्विति भावः ॥ उपजातिर्वृत्तं ॥ २५ ॥

ग० ॥ ततः प्रबलतरविरहाऽनलतीव्रज्वालाजालकंदलिताऽंतःकरणा व्रजाभरणभूतास्तास्तदुद्रेककारिणं चंद्रमालक्ष्य मंद्रमिदमूचुः ॥ ६ ॥

तत इति ॥ ततोनीपादिप्रश्नानंतरं ताः गोप्यः तदुद्रेककारिणं तस्य

विरहस्य उद्रेकः आधिक्यं उद्दीपनमिति यावत् तं करोति तत् शीलं चंद्रं आलक्ष्य दृष्ट्वा मंद्रं गंभीरं यथा स्यात्तथा मंद्रस्तु गंभीरे इत्यमरात् ॥ इदं वक्ष्यमाणमूचुः ॥ कीदृश्यस्ताः ॥ प्रबलतरेति ॥ प्रबलतरो विरह एवाऽनलस्तस्य तीव्रज्वालाजालेन कंदलितं व्याप्तमंतःकरणं यासां तास्तथाविधाः ॥ तथा ॥ व्रजेति ॥ स्पष्टं ॥ ६ ॥

प० ॥ अयं सुधांशुः किल कथ्यते तत्तथ्यं न मिथ्यैव मतिर्न इत्थं ॥ नो चेद्दृशं तापकरत्वमस्मिन्भवेत्कथं तेन स चंडभानुः ॥ २६ ॥

यदूचुस्तदेवाऽऽह ॥ सुधांश्वित्यादिचतुर्भिः श्लोकैः ॥ अयमाकाशे परिदृश्यमानः पदार्थः सुधांशुरिति यत्कथ्यतेलोकैरिति शेषः ॥ तत्कथ्यमानं तथ्यं यथार्थं न किंतु मिथ्यैव मृषैव इत्थं नः मतिरस्ति ॥ एतदेव व्यतिरेकेण द्रढयति ॥ नो चेत् मिथ्या नचेत् अस्मिन्परिदृश्यमाने पदार्थे भृशमत्यंतं तापकरत्वं कथं तेन तापकत्वेन हेतुना स चंडभानुः चंडाः क्रूरा भानवः किरणाः यस्यैवंविधो ग्रीष्मर्तुसंबंधीसूर्य एवाऽयं भवेत् इति संभावना ॥ उपजातिर्वृत्तं ॥ २६ ॥

प्राणाऽत्ययं करोष्यस्माद्दर्शनाच्च करादपि ॥ वियोगिनां त्वं दीनानां यस्माद्रात्रिचरोऽस्यहो ॥ ॥ २७ ॥

प्राणाऽत्ययमिति ॥ अहो इति संबोधने ॥ हेचंद्र यस्माद्धेतोः त्वं रात्रिचरो राक्षसः असि अस्माद्धेतोर्दर्शनात् करादपि करेत्युपल-

क्षणं हस्तादिभ्योऽपि ॥ हेतौ पंचमी ॥ वियोगिनां अतएव दीनानां प्राणात्ययं प्राणनाशं करोषि राक्षसत्वादेव दीनविघातकत्वं तदपि भयानकाऽऽकृतित्वाद्दर्शनमात्रेण कठोरनखयुतकराऽभिघातादिना च युज्यतइति भावः ॥ श्लेषेण रात्रिसंचारी दर्शनात् किरणसंपर्काच्च कामोद्दीपनेन विरहिणां प्राणात्ययकल्पं तापं करोषि ॥ ॥ २७ ॥

रात्रिचरः किल राजा बहुकरयुक्त्वं सुधायुतो यस्मात् ॥ सकलाऽऽस्याऽतिसुभयदो विरहिण्या रावणोऽस्ययं चंद्र ॥ २८ ॥

न केवलं राक्षसः किंतु राक्षसराजोऽसीत्याह ॥ रात्रीति ॥ अये चंद्र यस्माद्धेतोस्त्वं रात्रिचरः ॥ पूर्वोक्तएवार्थः ॥ तथा ॥ राजा एतत्पदवाच्यः ॥ राजा मृगांके क्षत्रिये नृपे इत्यमरः ॥ पक्षे त्रिलोक्या अधिपतिभूतः ॥ तथा ॥ बहुकरयुक् अनेककिरणविशिष्टः पक्षे विंशतिहस्तयुक्तः ॥ तथा सुधायुतः अमृतयुक्तः पक्षे स एवाऽर्थः ॥ रावणस्य हृदये अमृतस्थितिरित्यभियुक्तप्रसिद्धेः ॥ तथा ॥ विरहिण्या वियोगिन्याः ॥ सकलेति ॥ कलाभिः सहितं सकलं तच्चतदास्यं च तेनाऽतिसुभयदः यद्वा कलाभिः सहिता सकला सा चाऽसावास्या स्थिति स्तया कलापरिपूर्णस्थित्या अतिसुभयदः ॥ आस्यं मुखे च तन्मध्ये तद्भवे च स्त्रियां स्थितावितिमेदिनी ॥ पक्षे विरहिण्याः सीतायाः सकलैर्दशभिरप्यास्यैरतिसुभयदः असि तस्माद्धेतोः रावणोऽसि ॥ विरहोद्दीपकत्वेन विरहिण्या रोदयिताऽसि ॥ अत्र पक्षे विरहिण्या इत्यस्य मध्यम-

णिन्यायेनाऽत्राऽपि संबंधः ॥ पक्षे एतन्नामा राक्षसराजोऽसि ॥ किलेति संभावनायां ॥ २८ ॥

किंबहुना ॥ उडुपोऽप्यमृतैः पूर्णः क्षीणवर्ष्मा कराऽऽश्रितः ॥ मत्वा त्वां मृडफालाऽग्निसमीपे प्राक्षिपद्विधिः ॥ २९ ॥

उपसंहरंति ॥ किंबहुनेति ॥ उडुपइति ॥ विधिर्ब्रह्मा त्वां ॥ मृडेति ॥ मृडस्य शंकरस्य फालसंबंधी लक्षणया ललाटस्थनेत्रसंबंधी योऽग्निस्तत्समीपे प्राक्षिपत् ॥ किंकृत्वा ॥ उडुपः उडूनि नक्षत्राणि पातीत्युडुपः अमृतैः पूर्णोऽपि क्षीणवर्ष्मा क्षीणदेहः ॥ तथा ॥ कराश्रितः करैः किरणैराश्रितः इतिमत्वा ॥ श्लेषेण उडुपः प्लवः अल्पनौः ॥ उडुपं तु प्लवे ऽस्त्रियां ॥ चंद्रे पुंसीति मेदिनी ॥ चंद्रे नाऽस्त्र्युडुपः प्लवे इति त्रिकांडशेषश्च ॥ तत्राऽपि क्षीणवर्ष्मा क्षीणशरीरः शीर्णावयव इति यावत् ॥ अतएव अमृतैरुदकैः पूर्णः ॥ अतएव कराऽऽश्रितः करैर्हस्तैराश्रितो धृत इति यावत् ॥ उक्तविशेषणविशिष्टाल्पनौस्तरणाऽनुपयुक्तत्वात्पुनः संधानाऽनर्हत्वाच्च दग्धुमग्निसमीपे यथा प्रक्षिप्यते तथैवंविधस्त्वमनुपयुक्तत्वाच्छंकरभालाऽग्निसमीपे विधिना प्रक्षिप्त इति भावः ॥ २९ ॥

स्मर खरतरगरधरवरशरसंदोहैः प्रपीडनं कुरु मा ॥ नो चेत्तव जनकस्य स्याद्विरहाग्नेरतीव भोः पीडा ॥ ३० ॥

एवं चंद्रमुपालभ्य काममप्युपालभंते ॥ स्मरेति ॥ भोः स्मर हेका-

मं ॥ खरतरेति ॥ खरतरः क्रूरतरः यो गरो विषं ॥ गरी खरायां करणे क्लीबं नोपविषे विषे इति मेदिनी ॥ तस्य धरा धारका ये वरशराः श्रेष्ठबाणाः ॥ यद्वा ॥ खरतरा ये गरधराः सर्पास्तत्सदृशा ये वरशरास्तेषां ये संदोहाः समूहास्तैः कृत्वा प्रकर्षेण पीडनं मा कुरु ॥ निषेधार्थकोऽयं माशब्दो नतु माङ् ॥ तेन लोट्प्रयोग उपपद्यते ॥ नोचेत् पीडाकरणाऽभावो नचेत् तव जनकस्य त्वत्पितुर्मनसः अर्थादस्मदीयस्य ॥ कामस्य मनोजत्वात् ॥ विरहाग्नेः श्रीकृष्णविरहरूपस्याऽग्नेः संबंधिनी अतीव पीडा स्यात् ॥ यद्वा तव जनकस्य श्रीकृष्णस्यैव विरहाऽग्नेरस्मद्विरहरूपस्याऽग्नेः संबंधिनी पीडा स्यात् ॥ त्वदीयैतादृशशरधारासंपातेनाऽस्माकं चरमावस्थैव आपद्येत तथासति भगवतो मदेकतानमानसा अप्येता मद्विरहेणैवेमामवस्थां संप्राप्ता इत्यनुशयपूर्वकमशक्यप्रतिविधिरस्मद्विरहताप उत्पद्येतेतिभावः ॥ तव जनकस्येत्युक्त्या स्वपितुरनिष्टकारित्वेन तवाऽपकीर्तिर्भविष्यति ॥ किंच पितृत्वान्निरपराधस्वीयबंधकारिणस्तव शासनमपि स करिष्यतीति च ध्वन्यते ॥ ३० ॥

ग० ॥ एवं सुदुस्सहतद्विरहासवक्षीबाशयाः प्रतिवनं प्रतिद्रुमं पृच्छंत्यः प्रतिक्षणं प्रवर्धमानोन्मादाः प्रमदाः प्रसिद्धां स्वप्रेष्ठचेष्टां यथेष्टमनुचक्रुः ॥ ॥ ७ ॥

एवमिति ॥ प्रमदागोप्यः प्रसिद्धां ॥ स्वेति ॥ स्वस्य प्रेष्ठः प्रियतमः श्रीकृष्णस्तस्य चेष्टां लीलां यथेष्टं लीलानामानंत्याद्यथाभिलाषं अनुचक्रुः ॥ लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिका इत्युपक्र-

म्य कस्याश्चित्पूतनायंत्याइत्याद्युक्तप्रकारेणाऽनुकृतवत्य इत्यर्थः ॥ कीदृश्यः प्रमदाः ॥ एवमिति॥एवं पूर्वोक्तप्रकारेण ॥ सुदुःसहेति ॥ सुतरामत्यंतं दुःसहो यस्तद्विरहः श्रीकृष्णविरहः स एवाऽऽसवो मद्यं तेन क्षीबा मत्ताः उन्मादविशिष्टा इति यावत् आशया अंतःकरणानि यासां ताः ॥ मत्ते शौंडोत्कटक्षीबा इत्यमरात्॥ तथा॥ प्रतीति ॥ प्रतिवनं वनेवने प्रतिद्रुमं प्रतिवृक्षं पृच्छंत्यः ॥ तथा ॥ प्रतिक्षणप्रवर्धमानेति ॥ अर्थः स्फुटः ॥ पूर्वविशेषणे मदप्रादुर्भावमात्रमुक्तं अनेन तु तद्वृद्धिरूपो भगवत्तादात्म्यपूर्वकचेष्टाकरणे हेतुरुक्तः ॥ ७ ॥

ततः॥ प० ॥ विलासिन्याः पदैः सार्धं दृष्ट्वा तानि
विलासिनः ॥ वितर्कयंत्य स्संतप्ता अभिसस्रुर्व्र
जांऽगनाः॥ ३१ ॥

अथ लीलाऽनुकरणाऽनंतरं पुनर्भूमौ भगवत्पदानि पश्यंत्यो गोप्यः कस्याश्चित्पदसंपृक्तानि तानि दृष्ट्वा नितरामनुतापवत्यो ऽभूवन्नित्याह ॥ ततइति ॥ लीलानुकरणानंतरं ॥ विलासिन्याइति ॥ व्रजांगना गोप्यः विलासिन्याः कस्याश्चिद्गोप्याः पदैः सार्धं विलासिनः श्रीकृष्णस्य तानि पदानि दृष्ट्वा संतप्ताः सम्यक् तप्ताः ॥ विलासिनीपदसंपृक्तकृष्णपददर्शनेन पूर्वाऽपेक्षया ऽधिकतापवत्य इत्यर्थः ॥ तदुक्तं श्रीमद्भागवते॥तस्या अमूनि नः क्षोभं कुर्वंत्युच्चैः पदानि यदिति ॥ अथच अग्रे तस्याः पदान्यदृष्ट्वेतिशेषः वितर्कयंत्यो नानाविधतर्कान् कुर्वत्यः सत्यः ॥ ते च तर्काः न लक्ष्यंते पदान्यत्र तस्या नूनं तृणांकुरैः ॥ खिद्यत्सुजातांऽघ्रितलामुन्निन्ये

प्रेयसीं प्रिय इत्यादय उद्बोधकतत्तच्चिन्हदर्शनहेतुकाः श्रीमद्भागवतेप्रसिद्धाः ॥ अभिसस्रुरभितो गमनं कृतवत्यः ॥ ३१ ॥

तदंतरेंऽतरस्स्मयगोत्रशृंगच्युतां हि तां ता वनिता
विलोक्य॥ विपृच्छ्य मत्वा चरितं विचित्रपूरे म
मज्जुर्मनसाऽस्य नाव्ये॥ ३२ ॥

अथ गर्ववशात् कृष्णपरित्यक्तामनुतप्तां पूर्वं पददर्शनेनाऽनुमितविलासां तामेवाऽग्रतो ददृशुरित्याह ॥ तदंतरेइति ॥ ताः कृष्णाऽन्वेषणप्रवृत्ताः विलासिनीपददर्शनाऽत्यंताऽनुतप्ता वा वनिता गोप्यः तदंतरे तस्मिन् अवसरे ॥अंतरिति॥ अंतरभ्यंतरेयःस्मयो गर्वः सएव गोत्रः पर्वतः ॥ अद्रिगोत्रगिरिग्रावाऽचलशैलशिलोच्चया इत्यमरात् ॥ तस्य यत् शृंगं तस्माच्च्युतां पतितां ॥ कृष्णकृतपरित्यागाऽनंतरं सहसैव महताऽपि गर्वेण रहितामित्यर्थः ॥ तां कृष्णेन सह यातां गोपीं विलोक्य अस्य श्रीकृष्णस्य चरितं विपृच्छ्य च परं मनसा मत्वा मननं कृत्वा गर्व एव कृष्णवियोगे कारणं नाऽन्यदिति निश्चित्येत्यर्थः ॥ नाव्ये नौभिस्तार्ये ॥ नौवयोधर्मेत्यादिनायत् ॥ लक्षणया अगाधे विचित्रपूरे विशिष्टे आश्चर्यपूरे ममज्जुर्मग्ना बभूवुः ॥ तथाच श्रीमद्भागवते ॥ सा च मेने तदाऽऽत्मानं वरिष्ठं सर्वयोषितामित्यादिना तद्गर्वमुपपाद्य तत्परिहारार्थं ततश्चांऽतर्दधे कृष्ण इत्यनेनांऽतर्धानमुक्त्वा सा वधूरन्वतप्यतेत्यनेनाऽनुतापं तस्या उक्त्वा तथा कथितमाकर्ण्य मानप्राप्तिं च माधवात् ॥ अवमानं च दौरात्म्याद्विस्मयं परमं गता इत्युक्तं ॥ उपजातिर्वृत्तं ॥ ३२ ॥

तदनंतरं॥ तमश्छटासांद्रमिदं विलोक्य वनं द्रुमै स्ता विनिवृत्त्य तस्मात्॥ कलिंदजातीरमुपेत्य त स्थुर्जगुश्च तद्दर्शनलालसा वै॥ ३३॥

वदनंतरमिति॥ कृष्णपरित्यक्तगोपीसमागमानंतरं॥ तमइति॥ ताः गोप्यः द्रुमैः वृक्षैर्हेतुभिः तमश्छटया सांद्रं निबिडं इदं वनं वि- लोक्य तस्माद्वनाद्विनिवृत्त्येत्यादि शेषं स्फुटं॥ उपेंद्रवज्रा वृत्तं॥ ॥ ३३॥

विजयतेतरां प्राणप्रेष्ठ ते व्रज इहाऽनिशं जन्मना तव॥ तमपिसुस्थिरं वीक्ष्य सेंदिरा श्रयति चंच ला चंचलेक्षण॥ ३४॥

अथ यमुनातीरमागत्य यद्गीतवत्यस्तदाह॥ विजयतेतरामित्या- दिभिः षड्भिः॥ हे प्राणप्रेष्ठ प्राणाऽपेक्षयाऽपि प्रियतम श्रीकृष्ण॥ पदादि संयोगपरत्वे लघोर्गुरुत्वाभावस्य बोधनान्नात्र च्छंदोभंगः॥ एतेन त्वद्दर्शने सत्येव प्राणधारणमस्माकं नाऽन्यथेति व्यज्यते॥ इहाऽस्मिन् भूमंडले व्रजो व्रजाख्यो देशः तव जन्मना प्रादुर्भा- वेण अनिशं निरंतरं विजयतेतरां अत्युत्कर्षेण वर्त्ततइत्यर्थः॥ भाविभवज्जन्मभूमित्वेन पूर्वमुत्कर्षविशिष्टोऽपि इदानीं भवज्जन्म- ना निरतिशयोत्कर्षशाली जातइति भावः॥ एतादृशोत्कर्षशा- लित्वदीयदेशस्थिताभिरस्माभिर्दुःखिताभिर्भवितव्यमित्यत्यंताऽनु- चितमिति ध्वन्यते॥ हेचंचलेक्षण॥ अनेनाऽनेकनायिकावल्ल- भत्वं सूचितं॥ चंचलाऽपि सा इंदिरा लक्ष्मीः तमपि व्रजतीति व्रजइति व्युत्पत्त्या गमनकर्तारमपि सुस्थिरं वीक्ष्येति विरोधः॥

परिहारस्तु तमपि भवज्जन्मप्रयुक्तोत्कर्षशालिनं व्रजदेशमपि इ- ति॥ सुस्थिरं यथा स्यात्तथा श्रयति॥ सुस्थिरमित्यस्याऽऽवृत्त्या उभयत्र संबंधः॥ ३४॥

अहह हे सखे ते ऽधरामृतैर्विरहजाग्निना तप्तवर्ष्म णां॥ कलय शीततां शीतरश्मिवत् परमसुंदरैस्त त्क्षणं शृणु॥ ३५॥

अहहेति॥ अहहेति खेदे॥ हेसखे श्रीकृष्ण॥ एतेन समप्राणः सखा मत इत्यभियुक्तोक्त्याऽस्मत्समप्राणत्वेनाऽस्मद्दुःखवेत्तृत्वं त्वय्यस्तीति सूचितं॥ अस्मदुक्तमिति शेषः॥ शृणु॥ किंतदित्यत आहुः॥ विरहजाऽग्निना तप्तवर्ष्मणां तप्तदेहानामस्माकं ते परम- सुंदरैरत्यंतरुचिरैः॥ एतेन प्रसिद्धाऽमृताद्वैलक्षण्यं सूचितं॥ अध- राऽमृतैः कृत्वा तत्क्षणं अस्मत्प्रार्थनासमकालमेव शीतरश्मिवत् चंद्रवत् शीततां कलय कुरु॥ सूर्यतापतप्तानां यथा चंद्रः स्वकि- रणस्रुतसुधासमर्पणद्वारा शीततासंपादकस्तथा विरहतप्तानामस्मा- कं त्वमपि स्वाधरामृतवितरणद्वारेति भावः॥ ३५॥

ललित ते गतिं वीक्ष्य तादृशीं ननु गजैः स्थितं कानने किल॥ तदिह दर्शयंस्तावकीं हि तां तव सखीजनानेहि सत्वरं॥ ३६॥

ललितेति॥ ललित सुंदर यद्वा हे अस्मदीप्सित॥ ललितंत्रिषु॥ ललिते चेप्सितेऽपि स्यादिति मेदिनीकोशात्॥ ते तव तादृशीं ललितां गतिं वीक्ष्य ननु वीक्ष्यैव गजैः कानने स्थितं॥ किले-

ति संभावनायां ॥ तत्तस्मात्तव सखीजनानस्मान् तावकीं त्वत्संबंधिनीं तां गतिं इहाऽस्मिन् समये व्रजमंडले वा दर्शयन् सन् सत्वरं यथा स्यात्तथा अर्थादस्मत्संनिधिं एहि ॥ त्वद्गतिसदृशगतीनां गजानामपि वने स्थितत्वेन तद्दर्शनेन मनोविनोदनाऽसंभवात् गत्यंतराऽभावात्साक्षाद्भवतैव स्वीयगतिप्रदर्शनपूर्वकमागंतव्यमिति भावः ॥ ३६ ॥

तव मुखांऽबुजं नीलकुंतलैः परममंडितं वीक्ष्य कानने॥ घनवने स्थितं पद्मपुंजकैः प्रचुरलज्जया तत्प्रदर्शय॥ ३७॥

तवेति॥ हेश्रीकृष्ण पद्मपुंजकैः कमलसमूहैः कर्तृभिः॥ नीलकुंतलैर्नीलालकैः परममंडितमत्यंतभूषितं ॥ अनेन भ्रमरवैशिष्ट्याऽनुकृतिः सूचिता॥ एवंविधं ते मुखांऽबुजं वीक्ष्य प्रचुरलज्जया अत्यंतलज्जया कानने अरण्ये तत्राऽपि घनवने सांद्रजले स्थितं ॥ जीवनं भुवनं वनमित्युदकपर्यायेष्वमरः ॥ अतस्तत्तादृशं त्वदीयमुखांबुजं प्रदर्शय ॥ त्वन्मुखसदृशैर्यैर्मनोविनोदनं कर्तव्यं तानि पद्मान्यपि घनवनस्थितानीति भवता स्वमुखांऽबुजमेव प्रदर्शनीयमिति भावः ॥ एतेन त्वन्मुखसादृश्यलाभार्थमेव पद्मैराकंठं जलमज्जनपूर्वकं तपः क्रियते इति सूचनद्वारा पद्माऽपेक्षया भगवन्मुखस्याऽतिरमणीयत्वं व्यज्यते ॥ ३७ ॥

तव नखच्छटां वीक्ष्य सूद्भटां क्षणिकतामगाद्विद्युदुच्चयः ॥ विशदलज्जया प्राणनाथ तां कुरु कुचेषु नो विस्तृतां हितां ॥ ३८॥

तवेति ॥ हेप्राणनाथ यामिति शेषः सूद्भटां अत्यंतदेदीप्यमानामित्यर्थः एवंविधां तव नखच्छटां नखकांतिं वीक्ष्य विद्युदुच्चयः विद्युत्समूहः विशदलज्जया स्फुटया लज्जया हेतुना क्षणिकतामगात् ॥ नखानां रक्तवर्णत्वं स्निग्धत्वं तेजस्वित्वंच सामुद्रिके उत्तमलक्षणमुक्तं ॥ हितां विरहतापशामकत्वेन हितकारिणीं तां नखच्छटां नः कुचेषु विस्तृतां कुरु ॥ अस्मत्कुचेषु नखक्षतानि कुर्वित्यर्थः ॥ ३८ ॥

भोभो रमानाथ विहारदक्ष नो वियोगिनीनां परितप्तवक्षसि॥त्वदंघ्रिकंजद्वयमानिधेहि संविधेहि सानंदमहो दृगुत्सवम्॥ ३९॥

भोभोइति ॥ भोभोविहारदक्ष ॥ एतेन विहाररसिकस्य ते स्वयमेव प्रार्थितवतीनामस्माकं त्यागो नोचित इति सूचितं ॥ हेरमानाथ ॥ अनेन स्त्रीणां विरहभीरुत्वं कीदृशमिति रमायाः स्वहृदयनिवासेन त्वया ज्ञायतएवेति ध्वनितं ॥ वियोगिनीनां नः परितप्तवक्षसि त्वदंघ्रिकंजद्वयं त्वच्चरणकमलद्वयं आनिधेहि ॥ त्वद्विरहतापतप्तानामस्माकं हृदये प्रसिद्धकमलादिनिधानेन तापशांतिर्नास्ति किंतु त्वच्चरणतादात्म्यापन्नकमलनिधानेनैवेति तदेव प्रार्थ्यत इति भावः ॥ सानंदं यथा स्यात्तथा दृगुत्सवं विधेहि ॥ यद्वा अहो ऽद्यतनंदिनं दृशामुत्सवोऽर्थाद्भवद्दर्शनप्रयुक्तो यस्मिन् एवंविधं ॥ अतएव सानंदमानंदसहितं संविधेहि ॥ इंद्रवंशावंशस्थयोरुपजातिः ॥ ३९॥

ग० ॥ इत्थं तत्परमप्रिया निजप्रियगुणान् गायं
त्यस्तद्विप्रयोगप्रोद्भूतोन्मादभरात्प्रलपंत्यो दुर्द्धर्षवि
रहोषर्बुधप्रतापपीडया वीणागुणप्रक्कणं निपुणं
निर्भर्त्सयंत्यो मत्स्यो ऽमृतमंतरेव विव्हलाः सुस्वरं
परं रुरुदुः ॥ ८ ॥

इत्थमिति ॥ इत्थं पूर्वोक्तप्रकारेण तत्परमप्रियाः तस्य श्रीकृष्णस्य परमप्रियाः अत्यंतंप्रियाः गोप्य इति शेषः॥ दुर्धर्षेति ॥ दुर्धर्षो ऽसह्यो यो विरहएवोषर्बुधोऽग्निस्तस्य यः प्रतापस्तेन या पीडा तया ॥ शोचिष्केश उषर्बुध इत्यग्निपर्यायेष्वमरः ॥ अमृतमंतरा उदकं विना तदभावेनेतियावत् मत्स्य इव शफर्य इव॥ मत्सीत्यत्र मत्स्यशब्दाद्गौरादित्वान्ङीष् ॥ मत्स्यस्य ङ्यामिति यलोपः ॥ परं अत्यंतं विव्हला व्याकुलाः सत्यः सुस्वरं रुरुदुः ॥ सुस्वरमित्यनेन करुणरसव्यावृत्तिः॥ कथंभूतास्ताः ॥ निजेति॥ निजप्रियस्य ये गुणास्तान् गायंत्यः ॥ तथा ॥ तदिति ॥ तस्य श्रीकृष्णस्य यो विप्रयोगो वियोगस्तेन प्रोद्भूतो य उन्मादभर उन्मादातिशयस्तस्माद्धेतुभूतात् प्रलपंत्यः प्रलापं कुर्वंत्यः ॥ तथा ॥ वीणेति ॥ निपुणं वीणागुणप्रक्कणं वीणागुणध्वनिं निर्भर्त्सयंत्यः ॥ अर्थात्सुस्वररोदनध्वनिना ॥ अमृतमंतरामत्स्यइवेत्यनेन भगवद्दर्शनैकायत्तजीवितत्वं व्यज्यते ॥ ८ ॥

प० ॥ आविर्बभूव तरुणाऽरुणकंजनेत्र स्सम्य
क्स्मितांचितमुखः किल पद्ममाली ॥ पीतांबर

स्सजलनीरदनीलवर्ष्मा तासां व्रजे प्रबलमन्मथ
मन्मथोऽसौ ॥ ४० ॥

आविर्बभूवेति ॥ योजनार्थौ स्फुटौ ॥ तासां गोपीनां व्रजे समुदाये ॥ असौ श्रीकृष्णः ॥ अनेन तासामाविरभूच्छौरिः स्मयमाननमुखांबुजः ॥ पीतांबरधरः स्रग्वी साक्षान्मन्मथमन्मथ इत्यस्याऽर्थः संगृहीतः ॥ वसंततिलका वृत्तं ॥ ४० ॥

दृष्ट्वा प्रेष्ठतमं विलोलनयना उत्तस्थुरारात्द्रुतं तद्वि
श्लेषतपः फलं परमिमा आनंदसंदोहतः ॥ नाना
तापहरा मुहु स्सुखकरीश्चेष्टा यथेष्टं तदा चक्रुः
प्रेमसुधाऽऽसवप्रगलितोद्धैर्या अनंगातुराः ॥ ४१ ॥

दृष्ट्वेति ॥ इमा गोप्यः ॥ तद्विश्लेषेति ॥ सः पूर्वोक्तश्चाऽसौ विश्लेषो वियोग स्सएव तपस्तस्य फलं फलरूपं प्रेष्ठतमं श्रीकृष्णं आरात्समीपे दृष्ट्वा विलोलनयनाः संभ्रमेणचपलनेत्राः सत्यः आनंदसंदोहतः आनंदसंदोहेन द्रुतं शीघ्रं उत्तस्थुः ॥ तदा यथेष्टं चेष्टाः शृंगारव्यापारान् चक्रुः ॥ कीदृश्योगोप्यः ॥ अनंगातुराः कामातुराः अतएव ॥ प्रेमेति ॥ प्रेमैव सुधा सैवाऽऽसवस्तेन प्रगलितं उत्कृष्टं धैर्यं यासां ताः ॥ कीदृशीश्चेष्टाः ॥ नानातापहराः अनेकविधतापहारिकाः अतएव मुहुर्वारंवारं सुखकरीः ॥ शार्दूलविक्रीडितं वृत्तं ॥ ४१ ॥

ताराऽशनाऽऽसनसुताऽऽत्मजसुंदराऽऽस्या धर्माऽर्य
माख्यतनुजाऽथ विलोक्य शौरिं ॥ वाद्याऽभिधस्य

तनुजस्य सुतस्य लीलां सुभ्रूश्चकार समुदं नय नांऽबुजेन ॥ ४२ ॥

अथ राधिकायाः कामचेष्टावर्णनपुरःसरं कृष्णस्य तस्याश्चोक्तिप्रत्युक्ती वर्णयति ॥ तारेत्यादिसप्तभिः श्लोकैर्गद्यद्वयेनच ॥ अथ श्रीकृष्णाऽऽगमनाऽनंतरं सुभ्रूः सुष्ठु भ्रुवौ यस्या स्सा सुभ्रूः धर्माऽर्यमाख्यतनुजा धर्मपदेन तद्वाचको वृषशब्दोऽर्यमपदेन सूर्यवाची भानुशब्दश्च गृह्यते तयोर्द्वंद्वे धर्माऽर्यमणौ वृषभानुशब्दौ मिलितावाख्या नाम यस्य सधर्माऽर्यमाख्यो राधापिता वृषभानुस्तस्य तनुजा राधिका समुदं सहर्षं शौरिं श्रीकृष्णं विलोक्य नयनांऽबुजेन नेत्रकमलेन वाद्याऽभिधस्य वाद्यशब्देन वाद्यविशेषवाचकावानकदुंदुभिशब्दौ गृह्येते तौ समुदितावभिधा नाम यस्य स वाद्याभिध आनकदुंदुभिर्वसुदेवस्तस्य तनुजस्य तनयस्य श्रीकृष्णस्य सुतः कामस्तस्य लीलां चेष्टां चकार ॥ समुदमिति लीलाविशेषणं वा समुदं सहर्षां लीलामिति ॥ कीदृशी ॥ तारेत्यादि ॥ ताराः शुद्धमौक्तिकान्यश्नाति स ताराऽशनो हंसः ॥ तारो वानरभिन्मुक्ताविशुध्योः शुद्धमौक्तिकइति मेदिनीकोशात् ॥ स आसनं यस्य सताराऽशनाऽसनो हंसाऽसनो ब्रह्मा तस्य यः सुतोऽत्रिस्तस्य य आत्मजः पुत्रश्चंद्रस्तद्वत् सुंदरमास्यं यस्याः सा ॥ वसंततिलका वृत्तं ॥ ४२ ॥

सजलजलदनीलं कृष्णमाश्लिष्य ताप सपदि परिमुमोच प्रेयसी राधिका वै ॥ मधुरतरसुवाचा सा ह चैवं स्मिताऽऽस्या चुबुकमथ गृहीत्वा चुंब

यित्वा कपोले ॥ ४३ ॥

सजलेति ॥ प्रेयसी प्रियतमा राधिका सजलो यो जलदो मेघस्तद्वन्नीलं घनश्याममित्यर्थः ॥एतेन तापनिवर्तनस्य सौलभ्यं ध्वनितं ॥ एवंविधं कृष्णं आश्लिष्याऽऽलिंग्य सपदि तत्कालं तापं परिमुमोच सर्वतस्तत्याज ॥वै निश्चये॥ अथ चुबुकं अर्थात् श्रीकृष्णस्य गृहीत्वा हस्तेन धृत्वा कपोले स्वगल्ले चुंबयित्वा चुंबनं कारयित्वा सा राधिका स्मिताऽऽस्या स्मितमास्ये यस्याः सा स्मितास्या सती मधुरतरसुवाचा एवं वक्ष्यमाणमाह ॥मालिनी वृत्तं ॥ तल्लक्षणं ननमयययुतेयं मालिनी भोगिलोकैरिति ॥ ४३ ॥

विरहाऽर्कातपशांत्यै प्रेष्ठमुखेंदोः सुधैव पर्याप्ता ॥ अन्या सा नहि मुख्या किंतु विषस्याऽनुजाऽहि संप्राप्या ॥ ४४ ॥

यदुक्तवती तदाह ॥ विरहेति ॥ विरह एवाऽर्कः सूर्यस्तस्य य आतपस्तस्य शांत्यै तां कर्तुमित्यर्थः ॥ तुमर्थे चतुर्थी ॥ प्रेष्ठेति॥ प्रियतमस्य तव मुखसुधांशोः संबंधिनी सुधैव अधरामृतमेव पर्याप्ता समर्थेत्यर्थः ॥ प्रेष्ठेति संबोधनं वा अन्याप्रसिद्धा सा सुधा यतो मुख्या तापशमने प्रधानभूता अथच मुखे भवा मुख्या नहि अस्ति इति शेषः ॥ प्रियमुखभवा नाऽस्तीत्यर्थः ॥ किंतु विषस्याऽनुजा कनिष्ठसहोदरी विषोत्पत्त्यनंतरं तदुत्पत्तेः॥तथा॥अहिसंप्राप्या अहिभिः सर्पैः सम्यक् प्राप्तुं योग्या तस्याःपाताले ऽपि विद्यमानत्वात्॥ प्रसिद्धसुधाया विषसहोदरीत्वेन सर्पसंप्राप्यत्वेनच प्रत्युत तापप्रदत्वमेव नतु तापशामकत्वमतस्तापशांत्यर्थं प्रियमुख-

सुधांशुसंबंधिन्येव सुधा समर्थैति भावः ॥ गीतिरार्या वृत्तं ॥ आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ॥दलयोः कृतयतिशोभां तां गीतिं गीतवान्भुजंगेशः ॥ ४४ ॥

वस्तुतोविप्रयोगेऽपित्यधराऽमृतलब्धये ॥ नाथो ऽसि दुःखदः कृष्णाऽसन्निधौ सन्निधौ मम॥४५॥

वस्तुतइति ॥ हेकृष्ण त्वं वस्तुतस्तत्वतः मम नाथोऽसि ईश्वरोऽसि॥ विप्रयोगेऽपि वियोगेऽपि मम नाथ उपताकः असि ॥ तथा ॥ मम अधराऽमृतलब्धयेऽपि नाथोऽसि याचकोऽसि आशासानो वा असि ॥ नाथृनाधृया ञ्चोपतापैश्वर्याऽऽशीःषु ॥ अतएव असन्निधौ सान्निध्याऽभावे सन्निधौ सान्निध्ये च दुःखदः दुःखं ददातीति दुःखदः अथच दुःखं द्यति खंडयतीति दुःखदः असि ॥ ४५॥

ग० ॥इति तद्वाक्पीयूषं श्रवणचषकेणेव तद्वदन सीधु स्वमुखेन निपीय पुनः॥ ९॥

इतीति॥ इति उक्तप्रकारकं॥ तदिति॥ तस्याः राधिकाया या वाक् सैव पीयूषममृतं तत् ॥ श्रवणेति ॥ श्रवणमेव कर्ण एव चषकः पानपात्रं तेनेव ॥ चषकोऽस्त्री पानपात्रमित्यमरात् ॥ तद्वदनसीधु तस्या राधिकाया वदनसंबंधि यत्सीधु तत् राधिकाऽधरसुधामिति यावत् स्वमुखेन निपीय पुनरित्यस्योत्तरश्लोकस्थपरिष्वज्येत्यनेन संबंधः॥ ९ ॥

प० ॥पयोधरद्वये वा ऽस्या मदीयत्हृदये ऽधिकं ॥ काठिन्यमिति कंसारिः परिष्वज्याऽऽहराधिकाम्॥ ॥४६॥

पयोधरेति ॥ पुनः राधिकां परिष्वज्याऽऽलिंग्य कंसारिः श्रीकृष्णः आह ॥ पुनः परिष्वंगे फलमुत्प्रेक्षते ॥ अस्या राधिकायाः पयोधरद्वये स्तनद्वये अधिकं काठिन्यं अथवा मदीयत्हृदये मम कंसारेरिदं मदीयं तच्चतत्धृदयं च तस्मिन् ॥ एतेन हृदयस्याऽतिकाठिन्यं ध्वनितं ॥ इतीव इतिज्ञातुमिवेत्यर्थः ॥ ४६ ॥

कलंकींदुः क्षारं जलधिमयि वृद्धिं गमयति नवा शुष्कं कर्तुं किमपि सतु वस्तु प्रभवति ॥ प्रवृद्धं प्रीत्यब्धिं विरचयति ते द्राङ्मुखशशी तथा शोकां ऽभोधिं कलिलमयमाश्यानमकरोत्॥ ४७॥

अथ श्रीकृष्णकृतं प्रसिद्धचंद्रव्यतिरेकप्रदर्शनपूर्वकं राधामुखचंद्रवर्णनमनुवदति ॥ कलंकीति ॥ अयि राधे अयं ते मुखशशी मुखचंद्रः प्रीत्यब्धिं प्रीतिसमुद्रं द्राक् झटिति प्रवृद्धं विरचयति करोति तथा कलिलं गहनं शोकांभोधिं ॥ कलिलं गहनं समे इत्यमरात् ॥ आश्यानं शुष्कं अकरोत् ॥ व्यतिरेकेप्रसिद्धचंद्रस्य कलंकित्वप्रतिपादनादेतस्य अकलंकित्वमकथितमपि गम्यते ॥ सतु प्रसिद्धस्त्विंदुः कलंकी लक्ष्मवान् अपवादवांश्च अस्ति॥ अथच क्षारं जलधिं लवणसमुद्रं वृद्धिं गमयति प्रापयति ॥ किमपि वस्तु शुष्कं कर्तुं न वा प्रभवति नैव समर्थो भवति जलरूपत्वात्॥ शिखरिणी वृत्तं ॥ रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणीति तल्लक्षणात् ॥ ४७ ॥

ग० ॥ अये प्राणाऽधीश कलाधीशं त्वत्कुलाधीशं मैवं कथय॥ १० ॥

एवं स्वमुखाऽपेक्षया हीनत्वेन चंद्रस्य वर्णनं श्रुत्वा राधिका श्रीकृष्णं प्रत्याह ॥ अयेइति ॥ अये प्राणाऽधीश श्रीकृष्ण त्वत्कुलाधीशं त्वत्कुलनायकं तत्राऽपि कलाऽधीशं कलानां षोडशानां च तुःषष्टीनांच अधीशं चंद्रं एवं पूर्वोक्तकलंकित्वादिविशिष्टं माकथय॥ १० ॥

प० ॥ नाऽयं कलंकी किल नैजदोषात्कलावधिष्ठानजपंकयोगात् ॥ नोचेत्स्थितिर्विष्णुपदे कथं स्यादस्याऽमृतस्याऽपि च दातृता वै॥ ४८॥

ननु सर्वेपि चंद्रं कलंकिनमेव वदंति उपलभ्यते च तत्र कलंक इति दोषा वाच्या गुरोरपीति न्यायेन यथार्थकथने किंबाधकमिति चेत्तत्राह ॥ नायमिति ॥ अयं चंद्रो नैजदोषात्स्वीयदोषात् कलंकी न किंतु कलौ युगे अधिष्ठानजपंकयोगात् अधिष्ठानं मनस्तस्मिन् जातो यः पंकः पापं तद्योगात् कलंकी अस्ति ॥ चंद्रस्य मनोदैवतत्वात् तदधिष्ठानत्वं ॥ मनसो देवता चंद्र इति तु हृदयं चाऽस्य निर्भिन्नं चंद्रमाधिष्ण्यमाविशदिति भागवते प्रसिद्धं ॥ कलौ सर्वेषां मनांसि मलिनानि इति तत्संपर्कात्कलंकित्वं नतु स्वतःसिद्धमिति भावः ॥ नोचेत् पूर्वोक्तं नचेत् अस्य चंद्रस्य विष्णुपदे आकाशे श्लेषेण श्रीविष्णोः पदे स्थाने चरणे वा स्थितिः अपिच अमृतस्य दातृता सुधादातृत्वं श्लेषेण मोक्षदातृत्वं च कथं स्यात् ॥ स्वतः कलंकिनो विष्णुपदस्थित्यमृतदातृत्वे न घटेते इति स्वभावतः शुद्धं चंद्रं प्रत्येतद्भवदीयकथनं न युक्तमितिभावः ॥ उपजातिर्वृत्तं ॥ ४८ ॥

ग० ॥ ततो वदनद्युतितिरस्कृतचंद्रावलिश्चंद्रावलिः॥ ११ ॥

ततइति ॥ ततो राधिकाभाषणानंतरं ॥ वदनेति ॥ वदनद्युत्या मुखकांत्या तिरस्कृता चंद्राऽऽवलिश्चंद्रपंक्तिर्यया सा तथाविधा चंद्राऽऽवलिश्चंद्राऽऽवलिनाम्नी काचन गोपिका॥ अस्योत्तरश्लोके पपावित्यत्र कर्तृत्वेनाऽन्वयः ॥ ११ ॥

प० ॥ यदधरामृतपूर्तिवशात्सुधासममधुरं मधुरं स्वनमुच्चकैः॥ समस्तजत्प्रजडा त्वपि वंशिका तदुचितं त्विति पेयमहो पपौ॥ ४९॥

यदिति ॥ यच्च तदधराऽमृतमर्थात् श्रीकृष्णस्य तस्य या पूर्तिः पूरणं तद्वशादहो आश्चर्यं प्रजडाऽपि प्रकर्षेण जडाऽपि वंशिका ॥ सुधेति ॥ सुधयाऽमृतेन समाना धूर्यस्य तं ॥ ऋक्पूरब्धूरित्यप्रत्ययः ॥ सुधासदृशमित्यर्थः ॥ उच्चैरतिशयेन मधुरं स्वनं समस्तजत् हि निश्चितं इति हेतोः उचितं योग्यं पेयंतु पेयमेव तदधराऽमृतं पपौ ॥ द्रुतविलंबितं वृत्तं ॥ द्रुतविलंबितमाह नभौ भराविति लक्षणात् ॥ ४९ ॥

ग० ॥ अथ स तद्वदनचंद्रचकोरायमाणचेताश्चंचलश्चंचलामिदमुवाच॥ १२ ॥

अथेति ॥ चंद्राऽऽवलिभाषणानंतरं ॥ तद्वदनेति॥ तस्याश्चंद्रावल्या यद्वदनं तदेव चंद्रस्तस्मिंश्चकोरायमाणं चेतो यस्यैवंविधः ॥ चंचलः कामुकः सः श्रीकृष्णः चंचलां कांत्या चापल्येन च विद्युत्सदृशीं चंद्रावलिं ॥ चंचलः कामुकेनीले ॥ चंचला च तडिल्ल-

क्ष्योरिति हैमात् ॥ इदं वक्ष्यमाणमुवाच ॥ १२ ॥

प० ॥ शरच्चंद्रबिंबं तिरस्कृत्य शौभ्र्यं तदीयं प्रज
ग्राह वक्त्रं स्मितं तत् ॥ दरीदृश्यते ऽतः कलंकी
सुधांशुः प्रिये त्वज्जयं सूचयंल्लोकआस्ते ॥ ५० ॥

शरदिति ॥ हे प्रिये चंद्रावलि यद्यस्मात् ते वक्त्रं कर्तृ शरच्चंद्रबिंबं तिरस्कृत्य तदीयं शौभ्र्यं प्रकर्षेण जग्राह ॥ ननु गृहीतं शुभ्रत्वं क्व-र्त्ततइतिचेत्तत्राऽऽह ॥ स्मितमिति ॥ तच्चंद्रगृहीतं शौभ्र्यं स्मितं स्मितरूपं दरीदृश्यते ॥ अतः शौभ्र्यहरणाद्धेतोः सुधांऽशुरपि कलंकी अस्ति ॥ ननु सुधावशाद्गृहीतांऽशस्य पूरणं कुतो नेति चेत्तत्रा-ऽऽह ॥ त्वदिति ॥ लोके त्वज्जयं त्वदुत्कर्षं सूचयन् सन् आस्ते ॥ यथा लोके केनचित्पराभूतो लज्जावशात्पराजयचिन्हं धृत्वैव तिष्ठति पुनर्जयाशया तथैवायमपि स्थित इति भावः ॥ भुजंग-प्रयातं वृत्तं ॥ भुजंगप्रयातं भवेद्यैश्चतुर्भिरिति तल्लक्षणात् ॥ ५० ॥

अथ सुललितयाललितया च ॥ सुधायुग्मवशा
न्मृष्टं सौख्यदं रागकृत्किमु ॥ मत्वा तच्चर्वितं तन्व्या
तांबूलं जगृहे मुखे ॥ ५१ ॥

अथेति ॥ कृष्णभाषणानंतरं सुष्ठु ललितं शृंगारचेष्टाविशेषो यस्याः सा तथाविधया ललितया ललितानाम्न्या ॥ ललितं त्रिषु ॥ ल-लिते चेप्सितेऽपि स्यादिति मेदिनीकोशात् ॥ ललितलक्षणं तु अनाऽऽचार्योपदिष्टं स्याल्ललितं रतिचेष्टितमिति ॥ अत्र रतिचेष्टि-तं रत्यनुकूलसमीचीनसकलांऽगविन्यासात्मकं ॥ इदमुत्तरश्लोक-

स्थस्य तन्व्येत्यस्य विशेषणं ॥ सुधायुग्मेति ॥ तन्व्या गोप्या कर्त्र्या तच्चर्वितं तेन भगवता चर्वितं तांबूलं मुखे अर्थात् स्वमुखे जगृहे गृहीतं ॥ कर्मणिलिट् ॥ तांबूलशब्दस्य नपुंसके प्रयोगस्तु रत्न-स्थगिस्थितमिदं खदिरेण सार्धं तांबूलमंब वदनांऽबुरुहे गृहाणेति श्रीशंकराचार्यप्रणीतायां देवीमानसपूजायां प्रसिद्धः ॥ किंकृत्वा इदमिति शेषः इदं तांबूलं ॥ सुधेति ॥ सुधयोः चूर्णाऽधराऽमृत-योर्यद्युग्मं तद्वशात् मृष्टं स्वादु सुधाद्वययोगादतिस्वाद्वित्यर्थः ॥ सुधा लेपोऽमृतं स्नुहीत्यमरात् ॥ अतएव सौख्यदं सुखदातृ राग-कृत् रंजनकृत् प्रेमवर्धकं च मत्वा किमु ॥ ५१ ॥

ग० ॥ ततस्तदीयमुखचंद्रचकोरायमाणचक्षुर्विच
क्षणः स तामेवमाचचक्षे ॥ १३ ॥

ततइति ॥ ततः तदीयो ललितासंबंधी यो मुखचंद्रस्तस्मिन् वि-षये चकोरायमाणे चक्षुषी यस्य स तथाविधः ॥ तदीयमुखचंद्रं साऽऽदरमवलोकयन्नित्यर्थः ॥ विचक्षणः कुशलः सः श्रीकृष्णस्तां ललितां प्रति एवं वक्ष्यमाणप्रकारेणाऽऽचचक्षे उक्तवान् ॥ १३ ॥

प० ॥ व्यभ्राऽभ्रभ्राजिशुभ्रांऽशुशोभाभूरिभरं ब
लात् ॥ सुभ्रूस्तदाननेंदुर्द्राक् क्षीणवर्ष्मा ऽह्वराद्वि
सः ॥ ५२ ॥

तदाह ॥ व्यभ्रेति ॥ हेसुभ्रूः त्वदाननेंदुः त्वन्मुखचंद्रः ॥ व्यभ्रेति ॥ विगतान्यभ्राणि मेघा यस्मात्तद्व्यभ्रं तच्चतदभ्रमाकाशं तस्मिन् भ्राजते प्रकाशते तच्छीलो व्यभ्राऽभ्रभ्राजी सचाऽसौशुभ्रांऽशुश्चं-द्रस्तस्य या शोभा तस्या यो भूरिभरस्तं ॥ शरत्कालीनचंद्रशो-

भाऽतिशयमित्यर्थः ॥ बलात् द्रागहरत् ॥ एतदेव द्रढयति ॥ हि यस्मात् स चंद्रः क्षीणवर्ष्मा क्षीणशरीरः अस्ति ॥ चंद्रे क्षीणत्वं यदुपलभ्यते नतत्स्वाभाविकं किंतु त्वन्मुखहृतशोभासर्वस्वतये-त्यर्थः ॥ ५२ ॥

काचित्तुततः ॥ अस्याऽऽत्मजेनाऽहमनंगकेन सं प्रापितेमां विकलां दशां द्राक्॥ इतीव सा नेत्र शरान्मुमोच भ्रूदंडकोदंडसमुत्थितांस्तान्॥५३॥

अथ कस्याश्चित्कटाक्षाऽवलोकनमुत्प्रेक्षापूर्वकं वर्णयति ॥ काचित्त्विति ॥ अस्योत्तरत्राऽन्वयः अस्येति ॥ ततः कृष्णललितासंभाषणाऽनंतरं काचित्सा गोपी इतीव इतिविचार्यैव ॥ भ्रूदंडेति॥ भ्रूदंडएव कोदंडं धनुस्तस्मात्समुत्थितान् तान् स्नेहाऽसूयादिगाभ-ततया विचित्रान् नेत्रशरान् अत्र नेत्रशब्देन कटाक्षा लक्ष्यंते ॥ कटाक्षबाणानित्यर्थः ॥ मुमोच अर्थात् श्रीकृष्णे ॥ इतिकिं ॥ अस्य श्रीकृष्णस्याऽऽत्मजेन तनयेन अनंगकेन कुत्सितेनाऽनंगेन॥ कुत्सितेकः ॥ द्रागिमां विकलां दशां प्रापितास्मीति ॥ एवं मामतिपीडयन् स्वतनयस्त्वया किमिति ननिवार्यत इत्यभिप्रायवती कटाक्षपूर्वकं श्रीकृष्णमवलोकितवतीत्यर्थः ॥ उपजातिर्वृत्तं ॥ ॥ ५३ ॥

ग० ॥ ततस्तदीक्षणतीक्ष्णमार्गणैस्तन्मुखसुधामार्गणांतःकरण ईदृगवादीत्॥ १४॥

ततइति ॥ ततः ॥ तदिति ॥ तस्या ईक्षणानि कटाक्षाः तान्येव तीक्ष्णमार्गणास्तीक्ष्णबाणास्तैर्हेतुभिः तस्या गोप्या या मुखसुधा

तस्या मार्गणो याचकीभूतमंतःकरणं यस्य स तथाविधः ॥ मार्गणोयाचकेशरे ॥ याञ्चाऽन्वेषणयोः क्लीबमिति मेदिनीकोशात् ॥ स इति शेषः ॥ सः श्रीकृष्णः ईदृग्वक्ष्यमाणमवादीत् ॥ १४ ॥

प० ॥ भ्रूदंडकोदंडविसृष्टमुच्चकैः शिलीमुखद्वंद्वम वार्यविक्रमं॥ ममांऽगवल्लीं तुदतीह निर्व्रणं तथापि सौख्यप्रदमेव संततम्॥ ५४॥

भ्रूदंडेति॥ भ्रूदंडरूपेण धनुषा विसृष्टं अवार्यविक्रमं अवार्यो विक्रमः शक्तिसंपद्यस्य तदवार्यविक्रमं॥ विक्रमस्तु पुमान् क्रांतिमात्रे स्याच्छक्तिसंपदीति मेदिनीकोशात्॥ एवंभूतं शिलीमुखद्वंद्वं बाणयुग्मं साऽध्यवसानलक्षणयाकटाक्षद्वंद्वं कर्तृ ॥ अलिबाणौ शिलीमुखावित्यमरात् ॥ निर्व्रणं व्रणरहितं यथा स्यात्तथा ॥ अनेन प्रसिद्धबाणतो व्यतिरेको दर्शितः ॥ उच्चकैरतिशयेन मम अंगवल्लीं तनुलतां यद्यपि इति शेषः इहाऽस्मिन्समये तुदति व्यथयति तथाऽपि संततं निरंतरं सौख्यप्रदमेवाऽस्ति ॥ त्वदीयकटाक्षद्वयं ममांऽगवल्लीं तुददपि निरंतरसुखजनकमेवेति भावः ॥ इंद्रवंशावंशस्थयोरुपजातिर्वृत्तं ॥ ५४ ॥

ग० ॥ साऽपि तत्तनयविमुक्तेन विशिखेनेवतन्नयनेंदीवरशरेणाऽपि व्रणिताऽऽशयैवमभाणीत्॥ ॥ १५॥

साऽपीति ॥ पूर्वोक्तागोप्यपि ॥ तदिति ॥ तस्य श्रीकृष्णस्य यत्तनयो मदनस्तेन विमुक्तेन विशिखेनेव बाणेनेव ॥ तदिति ॥ तस्य यन्नयनेंदीवरं लक्षणया कटाक्षः स एव शरो बाणस्तेनाऽपि

हेतुना ॥ व्रणितेति ॥ व्रणितः संजातव्रण आशयोंऽतःकरणं यस्याः सा एवंविधा सती एवं वक्ष्यमाणमभाणीत् अवादीत् ॥ ॥ १५ ॥

प० ॥ अयिशिततरसुखकरवरकटाक्षपत्री करोति तव चित्रम् ॥ कुर्वंश्चेतसि रागं बहिरव्रणता मनंगनिर्मुक्तः ॥ ५५ ॥

तदेवाह ॥ अयीति ॥ अयि श्रीकृष्ण तव ॥ शिततरेति ॥ शिततरस्तीक्ष्णतरः सुखकरेषु वरः श्रेष्ठो यः कटाक्षएव पत्री बाणः अनंगनिर्मुक्तः अनंगेन स्वतोंऽगरहितेनाऽपि कामेन निर्मुक्तः सन्नपि चेतसि अर्थान्मदंतःकरणे रागंरक्तं क्लेशादिकं वा अथच अनुरागं ॥ रागः क्लेशादिके रक्ते इतित्रिकांडशेषात् ॥ रागस्तु मात्सर्ये लोहितादिषु ॥ क्लेशादावनुरागे च गांधारादौ नृपेऽपि चेति मेदिनीकोशाच्च ॥ कुर्वन्बहिरव्रणतां व्रणरहितत्वं च कुर्वन् अतएव चित्रं आश्चर्यं करोति ॥ सांगनिर्मुक्तो हि बाणो बहिर्व्रणकरणपूर्वकं बहिरेव रागं करोति सुखंच न करोति अयंतु तव कटाक्षबाणः अनंगनिर्मुक्तोऽपि बहिर्व्रणकरणाभावपूर्वकमेवाऽभ्यंतरे रागं जनयति सुखं च करोतीत्याश्चर्यमिति भावः ॥ गीतिरार्यावृत्तं ॥ ५५ ॥

काचित्कुचे ऽथ निदधे पदकंजमस्य मत्वा सुशीतलतमं जनकं द्युनद्याः ॥ काचित्तथा न किमु हस्त इतीव तस्य तत्राऽऽदधे तमतिहर्षभरेण तन्वी ॥५६॥

काचिदिति ॥ अथ काचित्तन्वी अस्य श्रीकृष्णस्य पदकंजं पदपंकजं यतो द्युनद्या भागीरथ्या जनकमुत्पादकं अतः शीतलतममत्यंतशीतलं मत्वा कुचे हृदयस्य कामपीडितत्वादतितप्ते स्वस्तने अतिहर्षभरेण निदधे ॥ काचिच्च यस्य चरणस्तथाविधस्तस्य हस्तस्तथा सुशीतलतमो न किमु इतीव इति मत्वेव तं हस्तं तत्र कुचे अतिहर्षभरेण निदधे ॥ वसंततिलका वृत्तं ॥ तल्लक्षणं ॥ उक्ता वसंततिलका तभजा जगौ ग इति ॥ ५६ ॥

ग० ॥ प्रेमप्रसररसिकहृदयां निजचरणेंदीवरेण साजात्यात्संयोजितकुचकुड्मलां तां रसिकः पीयूषासारमधुरवाण्यैवं बभाषे ॥ १६ ॥

प्रेमेति ॥ रसिकः श्रीकृष्णः तां प्रथमोपात्तां गोपीं प्रति ॥ पीयूषेति ॥ पीयूषोऽमृतं तस्य य आसारो वर्षणं तद्वन्मधुरा या वाणी तया एवं वक्ष्यमाणं बभाषे ॥ कीदृशीं ॥ प्रेमेति ॥ प्रेमप्रसरेण कृत्वा रसिकं सरसं हृदयं यस्याः सा तथाविधां ॥ तथा ॥ साजात्यात्सजातीयत्वसंबंधात् निजचरणेंदीवरेण निजचरणकमलेन सह संयोजितकुचकुड्मलां ॥ निजशब्देन श्रीकृष्णसंबंधि ॥ कुड्मलंचेंदीवरस्यैव ॥ अतएव साजात्योपपत्तिः ॥ १६ ॥

प० ॥ विषमेक्षणोऽहिघटितः प्रियेस्मरंत्यदहन्मृडो न किमिदं क्षमं भवेत् ॥ सुखदं च तद्वयमजीव यन्मुदा हृदि संस्थितं तमतथात्ववत्तव ॥ ५७ ॥

विषमेक्षणइति ॥ हेप्रिये ॥ मृडः मृडति सुखयतीति मृड इति व्युत्पत्त्या सुखकर्ताऽपि शिवः हि यतो विषमेक्षणः विषमाणि

त्रीणि ईक्षणानि यस्य विषमेक्षणः श्लेषेण विपरीतलोचनः ॥ लोकेऽपि यः कश्चिद्विपरीतदृष्टिर्भवति स घातुक एव भवति ॥ तथा ॥ अहिभिः सर्पैः स्वभावतः क्रूरैर्घटितो नित्यसंबद्धः अस्ति अतः स्मरं काममदहत् दग्धवान् इदमीदृशं तत्कर्तृकं कामदहनं क्षमं योग्यं न भवेत् किमु अपितु क्षममेव ॥ तथा ॥ तव हृदि स्थितं सुखदं तद्द्वयं लिंगाकृतिमृडतादात्म्याऽऽपन्नं कुचयुग्मं यतः अतथात्ववत् विषमेक्षणत्वाऽहिघटितत्वाऽभाववत् अतो मुदा तं स्मरं अजीवयत् जीवयतिस्मेत्यपि क्षमं न किमु अपितु क्षममेव॥ नवनंदिनी वृत्तं॥ तल्लक्षणं तु ॥ नवनंदिनी सजससैर्गुरुयुक्तैरिति॥ ॥ ५७ ॥

ग० ॥ धराधरधौरेयाशिरस्सरणिसंचरणनिपुणिमपरिचिचीषयेव निजस्तनशिखरिशिखरधृतचरणां निपुणां तामेव पुनर्हरिरेवं संजगाद॥ १७॥

धराधरेति ॥ हरिः श्रीकृष्णः धराधरेषु पर्वतेषु धौरेयो धूर्वहः पर्वतश्रेष्ठो गोवर्धन इति यावत् तस्य शिरःसंबंधिनी या सरणिर्मार्गस्तस्मिन्यत्संचरणं तद्विषये यो निपुणिमा नैपुण्यं तस्य या परिचिचीषा परिचेतुमिच्छा तयेव ॥ निजेति ॥ निजस्तनावेव शिखरिणौ पर्वतौ तयोर्ये शिखरे तयोर्धृतश्चरणोऽर्थात् श्रीकृष्णचरणो ययैवंविधां निपुणां चतुरां तामेव पूर्वोक्तां गोपीं प्रत्येव एवं वक्ष्यमाणं संजगाद ॥ १७ ॥

प० ॥ अहीनाऽभिमृश्यं गिरीशस्वभिख्यं सुकर्पूरगौरं वलक्षांऽशुलेखं ॥ ध्रुवं नीलकंठं हरद्वंद्वमेत

त् क्षमं कामदत्वं त्वमुष्मिन् हृदिस्थं॥ ५८॥

तदेवाह ॥ अहीनेति॥ हेप्रिये यतः हृदिस्थं त्वत्हृदयस्थितं ॥ हृद्युभ्यांचेति सप्तम्या अलुक् ॥ एतत् कुचद्वंद्वं हरद्वंद्वं हरयोः शिवयोः द्वंद्वमस्ति ध्रुवं अतस्तु अतएव अमुष्मिन् कुचद्वंद्वे कामदत्वं कामं ददाति तत्कामदं तस्य भावस्तत्वं पक्षे कामं द्यति खंडयतीति कामदस्तस्य भावस्तत्वं क्षमं योग्यं अस्ति ॥ कीदृशमेतत् हरद्वंद्वंच ॥ अहीनेति ॥ न हीनः अहीनस्तेन पुरुषोत्तमेन मयाऽभिमृश्यं स्पृश्यं पक्षे अहीनैः सर्पश्रेष्ठैर्भूषणभूतैरभिमृश्यं ॥ तथा॥ गिरीशेति ॥ गिरीशस्य पर्वतश्रेष्ठस्य सुतरां अभिख्या शोभा यस्मिस्तत् पर्वततुल्यमित्यर्थः ॥ पक्षे गिरीश इति सुष्ठु अभिख्या नाम यस्य तत् ॥ अभिख्या नामशोभयोरित्यमरात् ॥ तथा ॥ सुकर्पूरेति ॥ शोभनेन कर्पूरेणांऽगरागात्मकेन कृत्वा गौरं ॥ पक्षे सुकर्पूरवद्गौरं ॥ तथा ॥ वलक्षेति ॥ वलक्षांशोश्चंद्रस्य लेखेव लेखा नखरेखा यस्मिस्तत् पक्षे ॥ वलक्षांऽशुलेखा चंद्रलेखा शिरोभूषणत्वेन यस्याऽस्ति तत् ॥ अर्शआद्यच् ॥ यद्वा वलक्षांशोश्चंद्रस्य लेखा यस्याऽस्तीति ॥ तथा ॥ नीलेति ॥ नीलः कंठो यस्य तन्नीलकंठं ॥ अत्र कंठपदेन मेचकचूचुकभागो गृह्यते ॥ पक्षे प्रसिद्धं ॥ तोटकं वृत्तं ॥ तल्लक्षणं तु ॥ इह तोटकमंबुधिसैः प्रथितमिति ॥ ५८ ॥

काचित्प्राह॥ आल्यमृतोपमएष प्रेष्ठतमः किं विनिंदसि त्वामिमं॥ तत्तुच्छं स्वच्छैर्यत्त्याज्यं तस्मिन्नचोपमाऽर्हत्वम्॥ ५९॥

काचिदिति ॥ काचिद्गोपी स्वसखीं प्रति प्राह ॥ आलीति ॥ हे आलि सखि एष कृष्णः प्रेष्ठतमः अतएव अमृतोपमः अस्ति ॥ इति श्रुत्वाऽन्याऽऽह ॥ किमिति ॥ हेसखि त्वमिमं किं विनिंदसि ॥ अमृतोपमत्वकथनेनैतस्य निंदांकरोषि किमित्यर्थः ॥ नन्वमृतस्य परमोत्कृष्टत्वेन तदुपमया का निंदेति चेत्तत्राह॥ तदिति॥यद्यस्माद्धेतोः स्वच्छैर्निर्मलांतःकरणैर्मुमुक्षुभिः सद्भिः तत्सुधात्वेन प्रसिद्धममृतं त्याज्यं त्यक्तुं योग्यं ॥ तेषां मोक्षाभिलाषुकत्वेन भक्त्यभिलाषुकत्वेन चाऽमृते स्वर्गप्राप्ये आदराभावादित्यर्थः ॥ अतस्तुच्छं ततएव तस्मिन्नमृते उपमार्हत्वं श्रीकृष्णसादृश्ययोग्यत्वं नचाऽस्ति ॥ तस्य भगवतो मुमुक्षुभिर्ग्राह्यत्वात् ॥ गीतिरार्या वृत्तं ॥ ॥ ५९ ॥

किंच ॥ स्वल्पं स्वर्गे स्वाप्यं स्वाद्यं स्वास्येन नश्वरं त्वमृतम् ॥ श्रीकृष्णाख्यं श्रुतिदृङ्मुखेन पेयं सतां गणै स्सततम् ॥ ६० ॥

उक्ताऽमृतस्य व्यतिरेकप्रदर्शनपूर्वकं श्रीकृष्णस्योत्कृष्टत्वं वर्णयति ॥ किंचेति ॥ स्वल्पमिति ॥ अमृतं प्रसिद्धा सुधा स्वर्गे एव नाऽस्मिन्लोके स्वाप्यं सुखेन आप्तुं योग्यं तदपि स्वल्पं सुतरामल्पं न बहु अथच स्वास्येनैव स्वाद्यं स्वदितुं योग्यं नेत्तरैरिंद्रियैरितरास्यैर्वा तदपि नश्वरं नाशशीलं क्षयिष्णु इति यावत् एवंविधं अस्ति॥ तुशब्दो वैलक्षण्ये ॥ तदेवोपपादयति ॥ श्रीति ॥ श्रीकृष्णाख्यममृतं तु ॥ श्रुतीति ॥ श्रोत्राभ्यां लोचनाभ्यां मुखेनच नैकेन मुखेनैव ॥

श्रोत्रेण सादरश्रवणार्हं ॥ एतेनाऽन्यमुखद्वारा स्वाद्यत्वमपि स्फुटं ॥ दृग्भ्यां सादराऽऽलोकनार्हं मुखेन सादरगानार्हं चेत्यर्थः ॥ अथच न किंचित्कालं किंतु सततं निरंतरं ॥ अनेन नश्वरत्वाऽभावः सूचितः ॥ यद्वा ततेन वीणादिवाद्येन सहितं सततं सतां गणैः ॥ बहुवचनेन गणशब्दोपादानेन च स्वल्पत्वाऽभावः सूचितः ॥ पेयमस्ति ॥ देशाऽकथनेन चैतन्नस्वर्गमात्रप्राप्यमपरिच्छिन्नत्वाद्व्यापकत्वादिति सूचितं ॥ एवं चाऽतितुच्छप्रसिद्धाऽमृतोपमानेन प्रियस्य निंदैव फलिता भवतीति तत्तुल्यत्वं सुतरां त्वया नोद्भावनीयमिति भावः ॥ ६० ॥

ग० ॥ इति प्रियंवदप्रियावाक्सुधाऽऽसाराऽऽर्द्राऽऽशयः सतामेवं प्राऽवोचत् ॥ १८ ॥

इतीति ॥ इति पूर्वोक्तप्रकारेण प्रियंवदा चाऽसौ प्रिया च प्रियंवदप्रिया तस्या या वाक्सुधा वागमृतं तस्य य आसारोऽतिवृष्टिस्तया आर्द्रः स्निग्ध आशयोंऽतःकरणं यस्य स तथाविधः सः श्रीकृष्णः तां प्रियां प्रति एवं वक्ष्यमाणं प्राऽवोचत् ॥ १८ ॥

प० ॥ शारदस्विंदुवदने वाक्प्रागल्भ्यं ध्रुवं न तत् मित्रजीवाऽऽल्हाददेऽस्मिंश्चित्रमत्र रसप्रदे ॥ ६१ ॥

तदेवाह ॥ शारदेति ॥ हेप्रिये ते इति शेषः अत्र लोके अस्मिन् पुरोवर्तिनि शारदस्विंदुवदने शरदि भवः शारदः ॥ संधिवेलादीत्यण् ॥ स चाऽसौ सुष्ठु इंदुश्चंद्रस्तत्सदृशं यद्वदनं तस्मिन् वाक्प्रागल्भ्यं वाक्प्रौढिः ध्रुवं निश्चलं अस्ति तच्चित्रं आश्चर्यं न ॥ अत्र हेतुगर्भं विशेषणद्वयमाह ॥ मित्रेति ॥ सुहृज्जीवाऽऽनंददे ॥ तथा ॥

रसप्रदे शृंगाररसदातरि ॥ नह्येतादृशवाक्प्रागल्भ्यमंतरा मित्राऽऽनंददातृत्वं रसप्रदत्वं च घटतइति तन्नाश्चर्यप्रदमिति भावः ॥ अथ च शारदा सरस्वती अस्मिन्नस्तीति शारदं ॥ अर्शआद्यच् ॥ शारदं च तत् स्विदुवदनं च शारदंस्विदुवदनं तस्मिन् ॥ शारदानिवासभूते वदने इत्यर्थः ॥ शेषं समानं ॥ कीदृशे वदने ॥ मित्रेति ॥ मित्रस्त्रयीतनुः सूर्यः जीवो बृहस्पतिस्तयोराल्हाददायके ॥ तथा॥ रसप्रदे रसो वै स इति श्रुतिप्रसिद्धब्रह्मात्मकरसप्रदे ॥ ६१ ॥

ग० ॥ स्ववागमृतदीधितिविकसितमुखकुमुदस्मितमकरंदमिलिंदायमानचेताः प्रियतमः पुनस्तामेवं निजगाद॥ १९ ॥

स्ववागिति ॥ प्रियतमः श्रीकृष्णस्तां प्रियां प्रति पुनरेवं वक्ष्यमाणं निजगादेत्यन्वयः ॥ कीदृशः प्रियतमः ॥ स्वेति ॥ स्वस्य या वाक् सैवाऽमृतदीधितिश्चंद्रस्तेन विकसितं यन्मुखमेव प्रियावदनमेव कुमुदं तत्संबंधि स्मितमेव हास्यमेव मकरंदस्तस्मिन् मिलिंदायमानं भ्रमरायमाणं चेतो यस्य स तथाविधः ॥ १९ ॥

प० ॥ सितेऽपि तव मंदत्वं हास्ये चित्रमिदं प्रिये॥ मांगल्यस्याऽऽस्पदं रम्ये पीयूषाऽऽपूरितं मुखम् ॥ ॥ ६२ ॥

तदाह ॥ सितेऽपीति ॥ हे प्रिये तव हास्ये सितेऽपि शुक्रेऽपि मंदत्वं शनित्वं अस्ति ॥ सितः शुक्र इति ज्योतिर्वित्प्रसिद्धेः ॥ मंदौ स्वैरशनैश्चराविति त्रिकांडशेषाच्च ॥ तथा हेरम्ये तव मुखं मांगल्यस्य मंगलत्वस्य भौमत्वस्याऽऽस्पदं मंगलरूपमित्यर्थः॥ एवंविधमपि पीयूषाऽऽपूरितं अमृतपरिपूर्णं चंद्ररूपमित्यर्थः ॥ अस्ति इदं द्वयं चित्रं ॥ वस्तुतस्तु सिते शुभ्रवर्णे तव हास्ये मंदत्वं अस्ति तथा हेरम्ये तव मुखं मांगल्यस्याऽऽस्पदं अमृतपूरितं च अस्ति ॥ अत्राऽमृतं वाग्रूपं अधरामृतं च ॥ ६२ ॥

अथ काचित्सोपहासमेवमवादीत् ॥ पितरावतिसरलौ ते धवलावार्यो बलोऽपि तादृक्षः ॥ कृष्ण स्त्वं किमु कुटिलस्तद्धेतुं मां वदेति पृच्छामि ॥ ॥ ६३ ॥

अथकाचिदिति ॥ अथ कृष्णभाषणाऽनंतरं काचिद्गोपी ॥ शेषं स्फुटं ॥ तदाह ॥ पितराविति ॥ हे श्रीकृष्ण ते पितरावतिसरलौ अत्यंतमकुटिलौ तथा धवलौ गौरौ आर्यो ज्येष्ठो भ्राता बलोऽपि बलरामोऽपि तादृक्षः धवलः सरलश्च अस्ति एवं सति त्वं कृष्णः कृष्णवर्णः कुटिलश्च किमु जातइति शेषः इति पृच्छामि तद्धेतुं तत्कारणं मां प्रतिवद ॥ ब्रूञर्थत्वाद्वदतेर्द्विकर्मत्वं ॥ ६३ ॥

ततः स्मित्वा प्रियतमां प्रियतमः प्रियतमं प्राह॥ कुटिलालकनिकरास्ये रसरूपे त्वदनुषंगतो मनसा॥ उभयं तन्मयि नियतं सततं नान्योऽस्ति हेतुरत्राऽये॥ ६४ ॥

ततइति ॥ ततः प्रियाप्रश्नाऽनंतरं प्रियतमः श्रीकृष्णः स्मित्वा हास्यं कृत्वा प्रियतमां प्रति प्रियतमं अत्यंतप्रियं यथा स्यात्तथा प्राह कुटिलेति॥कुटिला ये ऽलकास्तेषां यो निकरः समूहस्तद्युक्तमास्यं यस्याः सा तत्संबोधनं हे कुटिलालकनिकरास्ये तथा हे रसरूपे

शृंगाररसरूपे अये प्रिये सततं निरंतरं मनसा अंतःकरणेन कृत्वा त्वदनुषंगतः त्वत्संबंधाद्धेतोर्मयि नियतं निश्चितं तत्पूर्वोक्तं उभयं कुटिलत्वं कृष्णत्वं च अस्ति अत्रोभयरूपत्वे ऽन्योहेतुर्नास्ति ॥ निरंतराऽनुध्यानेन त्वन्मुखगतकुटिलाऽलकगतं कौटिल्यं तथा त्वदभिन्नत्वापन्नशृंगाररसस्य कृष्णत्वेन तद्गतं कृष्णत्वं च मयि संक्रांतमितिभावः ॥ रसरूपे इत्यनेन द्रवीभूतपदार्थनिष्ठवर्णसंक्रांतिर्झटिति भवतीति तद्गतवर्णसंक्रमोमयि झटिति जात इति सूचितं ॥ ६४ ॥

कुटिलालकवृंदसंवृतं मुखमेतत्तवपश्यतः प्रिये ॥
कमलं सुमिलिंदसंकुलं न्विति शंका समुदेति मानसे ॥ ६५ ॥

प्रसंगात् कुटिलालकाऽलंकृतं तस्या मुखं वर्णयति ॥ कुटिलेति ॥ हेप्रिये तव कुटिलानामलकानां चूर्णकुंतलानां वृंदेन क्रीडासंभ्रमवशान्मुक्तबंधनेन संवृतं परितोवेष्टितं एतत्परिदृश्यमानं मुखं पश्यतोऽर्थान्मम मानसे इतिअनेन प्रकारेण शंकासमुदेति॥शंकाऽऽकारमाह॥कमलमिति ॥इदं सुमिलिंदैः पद्मरसाऽऽस्वादनेऽपि तदुपमर्दाऽसहिष्णुतया शोभनैर्भ्रमरैः संकुलं कमलं नु ॥ नुशब्दः शंकायां ॥ वैतालीयं वृत्तं ॥ षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरंतराः ॥ नसमाऽत्रपराऽऽश्रिता कला वैतालीयेंऽतेरलौ गुरुरिति तल्लक्षणात् ॥ ६५ ॥

ग० ॥अथ वदनसुधांशुपार्श्वसमवलंबिनीलकुटिलाऽलकद्वयांऽचलचुंबितकुचद्वयद्विगुणितशोभा

तिरेकामेकामेवं रसिकचूडामणिरभाणीत् ॥ २० ॥

अथेति ॥ अथ रसिकचूडामणिः श्रीकृष्णः एकां कांचित् गोपीं प्रत्येवमभाणीत् ॥ कीदृशीं ॥ वदनेत्यादि ॥ वदनमेव सुधांशुश्चंद्रस्तस्य पार्श्वयोः समवलंबि सम्यग्लंबमानं यन्नीलकुटिलालकद्वयं तस्य यौ चंचलौ प्रांतभागौ ताभ्यां चुंबितं यत्कुचद्वयं तेन कृत्वा द्विगुणितः शोभातिरेकःशोभातिशयो यस्यास्तां ॥ २० ॥

प० ॥ शंभुद्वयजटाजूटं समुत्सृज्याऽमृताय तत् ॥
पन्नगीद्वयमत्र द्रागमृतांऽशुं समग्रहीत् ॥ ६६ ॥

यदभाणीत्तदाह ॥ शंभ्विति ॥ अत्राऽस्मिन् समये ॥ अत्र सादृश्यात्पन्नगीद्वयशब्देन मुखपार्श्वविलंबि अलकसमुदायद्वयं शंभुद्वयशब्देन स्तनद्वयं जटाजूटशब्देन मेचकचूचुकभागोऽमृतांशुशब्देनमुखंचेति सर्वसाध्यवसानलक्षणयाबोध्यं ॥तत् जटाजूटालंकारत्वेन प्रसिद्धं पन्नगीद्वयं कर्तृ अमृताय अमृतं लब्धुं ॥ तुमर्थे चतुर्थी ॥ शंभुद्वयजटाजूटं समुत्सृज्य द्राक् झटिति अमृतांशुं चंद्रं अग्रहीत् ॥ जटाजूटे तृतीयनेत्रसंबंधितापप्राप्त्या तच्छमनार्थं तत्रत्यचंद्रकलामतिलघुत्वेन परित्यज्याऽमृताभिलाषेण परिपूर्णचंद्रमेव गृह्णातिस्मेति भावः ॥ अत्र विलंबिन्या अलकलतायाः प्रांतभागे ऽतिसूक्ष्मत्वात्तदुपरि क्रमेण मूलभागेऽतिस्थूलत्वात्पन्नग्या अपि पुच्छात्प्रभृति फणापर्यंतं तथाविधत्वादुभयोः श्यामत्वेन च सादृश्यात्पन्नग्युपमानेनाऽलकलताया उपमेयभूताया निगरणंबोध्यं ॥ ६६ ॥

ग० ॥अथ मलयाऽनिलरथाऽशिथिलसंगरशिथि

लधम्मिल्लां प्रतीत्थं वाचमुत्थापयामास व्रजनाथः॥ २१ ॥

अथेति ॥ अथ व्रजनाथः श्रीकृष्णः ॥ मलयाऽनिलेति ॥ मलयाऽनिलएव रथो यस्य समलयानिलरथः कामस्तस्य शिथिलो दृढो यः संगरः संग्रामो दृढं कामयुद्धं सुरतमितियावत् तेन हेतुना शिथिलः श्लथो धम्मिल्लः संय्यताः कचा यस्याः सा तां कांचिद्गोपीं प्रति इत्थं वक्ष्यमाणप्रकारेण वाचं उत्थापयामास ॥ ॥ २१ ॥

प० ॥ वयमसिता अपि केशाः सिताः कथं कुसुमपत्रिसमरेऽत्र ॥ इति मुक्ता अभिसस्नु स्निग्धा स्सुमनस्सहायवंतस्ते ॥ ६७ ॥

तां वाचमेवाह ॥ वयमिति ॥ हेप्रिये तव केशाः इति विचार्यैव मुक्ताः संतोऽभिसस्नुः ॥ इतीति किमित्यत आह॥वयमिति ॥ सुस्निग्धाः सुतरा मत्यंतंस्निग्धाः प्रसाधनादिना स्नेहयुक्ताः नतुरूक्षाः ॥ अथ च वयस्यः स्निग्धः सवया इत्यमरात् सुहृदः ॥ तथा सुमनःसहायवंतः सुमनसः पुष्पाण्येव सहायास्तद्वंतः नानाविधपुष्पाऽलंकृताइत्यर्थः ॥ अथच देवसहायवंतः ॥ यद्वा सुमनसः स्वस्थचित्ता धैर्यवंतो ये सहायास्तद्वंतः वयं ॥ आभ्यां विशेषणाभ्यां युद्धे परित्यागाऽयोग्यत्वंध्वनितं ॥ असिताः नसिता असिताः अबद्धाः प्रतिबंधरहिता इति यावत् एवंविधा अपि अत्राऽस्मिन्निदानीं निर्वर्तमाने ॥ कुसुमपत्रीति ॥ कुसुमानि पत्रिणो बाणा यस्य स कुसुमपत्री पुष्पबाणो मदनस्तस्य समरे संग्रामे सिताः बद्धाः कथं इति शब्दतो विरोधः ॥ बद्धाऽर्जुनौ सितावित्यमरः ॥ वस्तुतस्तु असिताः कृष्णाः सिताः संयमनसाधनतंतुना बद्धा इति ॥ अतिनिःसारैः पुष्परूपैर्बाणैर्युध्यतः कामस्य समरे पूर्वोक्तगुणविशिष्टानामस्माकं बंधनमनुचितमिति विचार्यैव मुक्ता बभूवुरित्यर्थः ॥ यद्वा स्निग्धाः सुमनःसहायवंतस्ते तव केशा इति उक्तप्रकारेण विचार्यैवेत्यन्वयः ॥ शेषंपूर्ववत् ॥ ॥ ६७ ॥

ग० ॥ पुनश्च संजातनिजविरहनखंपचोष्णघृष्टिप्रतापितप्राणप्राणप्रियावृंदस्य स्ववदनशीतरश्मिस्रुतवाक्सुधाऽऽसारेणाऽमंदशीतलिमसिध्यै प्रियतमः प्रहसन्प्रत्येकमिदं प्रोवाच ॥ २२ ॥

पुनश्चेति ॥प्रियतमः श्रीकृष्णः॥ संजातेति॥ संजातो यो निजविरहः स्ववियोग स्सएव नखंपचः अर्थात् अतितापकरः यः उष्णघृष्टिः सूर्यस्तेन प्रतापिताः प्राणा यासां तास्तथाविधा याः प्राणप्रियास्तासां यद्वृंदं तस्य॥स्वेति॥स्वस्य यद्वदनं तदेव शीतरश्मिश्चंद्रस्तस्मात्स्रुता या वाक्सुधा तस्या आसारेण धारासंपातेन॥ अमंदेति ॥ अमंदो ऽनल्पो यः शीतलिमा तस्य सिध्यै सिध्यर्थं प्रहसन् सन् प्रत्येकमेकैकां गोपींप्रति पुनः इदं वक्ष्यमाणं प्रोवाच॥ ॥ २२ ॥

प० ॥ मुखमुन्निद्राब्जं ते युक्तं त्वमृतैश्च यैश्च मुक्तानाम् ॥ मानसमधितिष्ठति यत्तच्चित्रं किं सदैव योग्यमिदम् ॥ ६८ ॥

तदाह ॥ मुखमिति ॥ हेप्रिये ते तव मुखं उन्निद्रं विकसितं यदब्जं कमलं तदेव अस्ति हि यस्मादमृतैरधरसंबंधिभिः पक्षे उदकैः तथा मुक्तानां चयैः पक्षद्वयेऽपि मौक्तिकसमुदायैः युक्तं ॥ आद्ये नासादिस्थानेषु द्वितीये मानसे सरसि मुक्तानां सद्भावात्तद्युक्तत्वं ॥ यद्वा मुखपक्षे मुक्ताशब्देन साध्यवसानलक्षणया रतिश्रमजनिताः स्वेदबिंदवो हास्ये व्यज्यमाना दंता वा गृह्यंते ॥ अतो मानसं मन्मनः पक्षे मानसं सरः अधितिष्ठति ॥ अधिशीङिति कर्मत्वं ॥ इति यत्तच्चित्रं किमिति काकुः ॥ अपितु इदं सदा योग्यमेव ॥ निरंतरममृतनिवासत्वान्मौक्तिकयुक्तत्वाच्च मानसस्थितिरस्य युक्तैवेति भावः ॥ ६८ ॥

वक्रत्वात् किमु कामकार्मुकमिदं तैक्ष्ण्यात्तदीयः
शरः पीयूषं किमु तत्सदेहकरणान्माधुर्यतश्चाऽपि
सः॥ क्ष्वेडः किं धृतिनाशनेन दयिते चापल्यतः
खंजनो निश्चेतुं नहि शक्नुमो ननु वयं यस्ते कटा
क्षः प्रियः॥ ६९ ॥

कस्याश्चित्कटाक्षं वर्णयति ॥ वक्रत्वादिति ॥ प्रियः हृद्यः ॥ प्रियो हृद्येऽन्यवदिति मेदिनीकोशात् ॥ यस्ते तव कटाक्षः सः वक्रत्वाद्धेतोरिदं प्रसिद्धं कामकार्मुकं कामधनुः किमु ॥ वा तैक्ष्ण्यात्तीक्ष्णत्वाद्धेतोः तदीयः कामसंबंधी शरः किमु ॥ वा तत्सदेहकरणात् तस्य कामस्य यत्सदेहकरणं सांगत्वसंपादनं तस्माद्धेतुभूतात्तदुज्जीवनादिति यावत् ॥ सदेहेति भावप्रधानो निर्देशः॥

अपिच माधुर्यतः पीयूषममृतं किमु ॥ वा धृतिनाशनेन धैर्यनाशनेन क्ष्वेडः विषं किमु॥क्ष्वेडस्तु गरलं विषमित्यमरः॥वा चापल्यतः खंजनः खंजरीटः किमु ॥इति वयं निश्चेतुं निर्णेतुं नहि शक्नुमः अनेकविधतर्कस्फुरणादेकमपि निर्णेतुमस्माकं शक्तिर्नाऽस्तीत्यर्थः॥ शार्दूलविक्रीडितं वृत्तं ॥ सूर्याऽश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितमिति तल्लक्षणात् ॥ ६९ ॥

रूपसरसि कमले किं प्रीतिसुनद्यां दृशौ हि ननु
मीनौ॥ शुशुभाते तव भामिनि शशिपंजरगत
सुखंजरीटौ किं॥ ७० ॥

इदानीं कस्याश्चिद्दृशौ वर्णयति ॥ रूपेति ॥ हेभामिनि तव दृशौ रूपसरसि सौंदर्याख्ये सरसि ॥ रूपं स्वभावे सौंदर्ये इत्यमरात् ॥ कमले किमिति वितर्के ॥ किं कुत्सायां वितर्केचेति मेदिनीकोशात् ॥ अथवा प्रीतिसुनद्यां प्रीतिः स्नेह रसएव या सुनदी तस्यां मीनौ मत्स्यौ ननु ॥ आकृतिसाजात्याच्चापल्यतश्चाऽयंतर्कः ॥ अथवा ॥ शशीति ॥ शशी चंद्रः सएव पंजरस्तस्मिन् गतौ प्राप्तौ यौ सुतरामुत्तमौ खंजरीटौ खंजनौ किं ॥ शुशुभाते इति त्रिष्वप्यन्वेति ॥ ७० ॥

त्वदास्यं किल नालीकं सत्यं तेनैव सूच्यते ॥ श्री
स्थानं निर्जराऽऽसेव्यं मानसस्थं यतः सदा॥ ७१ ॥

कस्याश्चिन्मुखं वर्णयति॥त्वदिति॥हेप्रिये किलेति संभावनायां त्वदास्यंत्वन्मुखं नालीकं पद्ममस्ति॥नालीकौ पद्मनाराचाविति त्रिकांडशेषात्॥ नालीकं पद्मवर्धने इति हैमात्पद्मवाचकस्य नपुंसकत्वं॥

एतत्सत्यं यथार्थमेव॥कुत इत्यत आह॥तेनेति॥तेनैव नालीकपदेनैव सूच्यते॥नालीकमित्यत्र पदविभागे कृते अलीकमसत्यं नेत्यर्थो भवति॥अत्र हेतुगर्भं विशेषणत्रयमाह॥श्रीति॥ यतः श्रियः शोभायाः स्थानं पक्षे श्रियो लक्ष्म्याः स्थानं ॥ तथा ॥ निर्जरेति ॥ निर्जरेण यूना मया आसेव्यं ॥ पक्षे निर्जरैर्देवैः आ अतिशयेन सेव्यं ॥ कमलेषु तेषामतिप्रीतेः ॥ तथा सदामानसस्थं मन्मनःस्थितं पक्षे मानससरःस्थितं ॥ ७१ ॥

अयं शशांकः कृतपंकशंको दोषाऽऽकरो विष्णुपदस्थितस्तु॥जमध्यगां तां तनुते त्वदास्यं नैतद्धि चित्रं ननु मानसस्थे॥७२॥

अयमिति ॥ हेप्रिये अयं चंद्रः यतो विष्णुपदस्थितः विशति सर्वत्र प्रविशतीति विष्णुस्तस्य पदे स्थितः यतश्च शशांकः शशः अंकश्चिन्हं यस्यैवंभूतः तथा दोषाकरः अतः ॥ कृतेति ॥ कृता पंकस्य समुद्रसंबंधिनः शंका येन सः कृतसमुद्रसंबंधिपंकशंकइत्यर्थः ॥ एवंविधः अस्ति ॥ सर्वत्र प्रवेशकपदे स्थितत्वादेतस्य समुद्रसंबंधिपंकशंकाकरणं युज्यतइति भावः ॥ त्वदास्यं तु तां पंकशंकां कुरुते परंतु जमध्यगां जः जकारः मध्यगो यस्याः सा तथाविधा तां पंकजशंकां कुरुते इत्यर्थः॥ एतन्मानसस्थे मन्मनःस्थिते श्लेषेण मानसाख्यसरःस्थिते विचित्रं नास्ति ननु ॥ मानससरसि हि पंकजानां विद्यमानत्वात् एवंच प्रसिद्धचंद्राऽपेक्षया त्वन्मुखस्य व्यतिरेकोऽपि स्फुट इति भावः ॥ उपजातिर्वृत्तं ॥ ७२ ॥

अरालाऽलकाऽऽस्ये मरालाऽऽगतिस्ते मरालाऽऽसनेनाऽऽहिताऽभ्यासतो वै ॥ मुखे पौत्रसाम्यं कुचे पुत्रतौल्यं करे तातसादृश्यमार्ये पदे च ॥७३॥

अथ ब्रह्मणा त्वन्निर्माणवेलायां सन्निहितस्वीयहंसादीनां गत्याद्याधानं त्वदंगेषु कृतमिति अपरां प्रत्याह ॥ अरालेति ॥ हे अरालाऽलकास्ये अरालाः कुटिला ये अलकास्तद्युक्तं आस्यं मुखं यस्यास्तत्संबोधनं हे आर्ये श्रेष्ठनायिके मरालाऽऽसनेन हंसासनेन ब्रह्मणा वै निश्चयेन अभ्यासतः अभ्यसनाद्धेतोः ॥ यद्वा अभ्यासतः सामीप्याद्धेतोः ॥ भावप्रधानो निर्देशः ॥ अभ्यासोऽभ्यसनें तिके इति मेदिनीकोशात् ॥ ते तव मरालागतिः मरालवद्धंसवत् आ ईषत् मंदेति यावत् एवंविधा गतिर्गमनं आहिता कृता तथा ॥ मुखे पौत्रसाम्यं पौत्रस्यात्रिपुत्रस्य चंद्रस्य साम्यं आहितमिति लिंगव्यत्ययेनाऽन्वयः ॥ कुचेस्तने पुत्रतौल्यं रुद्रतौल्यं तच्च नीलकंठत्वादिसाधर्म्याद्बोध्यं ॥ आहितं ॥ करे च परं पदे च तातसादृश्यं कमलसादृश्यं आहितं ॥ ब्रह्मणः कमलोद्भवत्वात्कमलस्य तत्तातत्वं ॥ भुजंगप्रयातं वृत्तं ॥ ७३ ॥

वलक्षौ रसपूर्णौ ते कृष्णमध्यौ समुन्नतौ ॥ तारवर्गाऽऽवृतौ भातो वक्षोजौ तन्वि चंद्रवत्॥७४॥

अपरां प्रत्याह ॥ वलक्षाविति ॥ हेतन्वि ते तव वक्षोजौ स्तनौ चंद्रवद्भातः शोभेते ॥ कीदृशौ वक्षोजौ चंद्रश्च ॥ वलक्षौ गौरौ पक्षे वचनव्यत्ययेन गौरो धवलः ॥ एवमेवाऽग्रेऽपि वचनव्यत्ययो बोध्यः ॥ तथा॥रसपूर्णौ रसेन श्रृंगाररसेन पूर्णौ पक्षे अमृतेन पूर्णः॥

तथा ॥ कृष्णमध्यौ कृष्णौ कृष्णवर्णौ मध्यौ मध्यभागौ ययोस्तौ पक्षे कृष्णः सकलंकत्वेन कृष्णवर्णविशिष्टो मध्यो मध्यभागो यस्य सः ॥ तथा ॥ समुन्नतौ सम्यक् उन्नतौ पक्षे आकाशवर्तित्वादुच्चः ॥ तथा ॥ तारेति ॥ ताराणां शुद्धमौक्तिकानां वर्गेण हारेणेति यावत् आवृतौ पक्षे नक्षत्रवर्गावृतः ॥ तारो वानरभिन्मुक्ताविशुद्ध्योःशुद्धमौक्तिके ॥ ना नक्षत्रे ऽक्षिमध्ये च न ना रूप्ये नपुंसकमिति मेदिनी ॥ ७४ ॥

मध्यं विनाऽपि यद्योगो भागयोरस्ति नित्यशः ॥
देहस्य तव मन्येऽहं वर्णाऽनुस्वारयोरिव ॥ ७५ ॥

अन्यस्या मध्यस्य अतिसूक्ष्मत्वाददृश्यत्वेन तदभावं निश्चित्य तं विना शरीरस्थितिं वर्णयति ॥ मध्यमिति ॥ हेप्रिये तव देहस्य भागयोः असंयुक्तयोरंशयोः मध्यं विनाऽपि नित्यशः योगोऽस्ति इति यत् तत् वर्णाऽनुस्वारयोर्योगइवेत्यहंमन्ये ॥ वर्णाऽनुस्वारयोर्यथा विविक्तयोस्सतोरपि योगस्तथा त्वद्देहभागयोरपीत्यर्थः ॥ ॥ ७५ ॥

चंद्रज्योत्स्नेव देहस्ते तारपंक्त्यभिवेष्टितः ॥ तथापि
चित्रं स्वगुणै रक्तं मां कुरुते सदा ॥ ७६ ॥

कां चित्प्रत्याह ॥ चंद्रेति ॥ हेप्रिये तव देहः यतः ॥ तारेति ॥ ताराणां शुद्धमौक्तिकानां पक्षे नक्षत्राणां पंक्त्या अभिवेष्टितः अतश्च यद्यपीति शेषः चंद्रज्योत्स्नेव चंद्रिकेव अस्ति गौरभास्वरत्वात् तथाऽपि स्वगुणैरात्मीयैर्लावण्यादिभिर्मां सदा रक्तं अनुरक्तं कुरुते॥ श्लेषेण स्वगुणैः स्वसंबंधिभिर्वर्णैः रक्तं रक्तवर्णविशिष्टं ॥ एतच्चित्रं॥चंद्रिकासदृशत्वाच्छुक्लीकरणस्य योग्यत्वेऽपि सार्वदिकं रक्तीकरणं तत्सादृश्यादेव देहस्य शुक्लवर्णमात्रवैशिष्ट्ययोग्यतायामपि अनेकवर्णवैशिष्ट्यं च श्लेषेण प्रतीयमानमाश्चर्यकरमिति भावः ॥ ७६ ॥

श्रुत्यास्पदं सुविमलैर्वसुभिः प्रशोभं ताटंकसूर्य
युगलं प्रसमीक्ष्य नूनं ॥ नेत्राऽब्जयुग्ममभवत्तव
भामिनीदं फुल्लं कचाऽऽल्यलिकुलं तरलं च तेन॥
॥ ७७॥

अथ विकसितलोचनां लसन्माणिक्यताटंकां व्यत्यस्तालकामन्यां प्रत्याह ॥ श्रुत्यास्पदमिति ॥ हेभामिनि तव इदं नेत्राऽब्जयुग्मं नेत्रकमलयुगलं कर्तृ ताटंकसूर्ययुगलं ताटंके एव सूर्यौ तयोर्युगलं युग्मं कर्म प्रसमीक्ष्य नूनमिति वितर्के फुल्लं विकसितं अभवत् तेन नेत्रविकसनेन हेतुना कचानामालयः पंक्तय एवाऽलयो भ्रमरास्तेषां कुलं च तरलं चंचलं अभवत्॥कीदृशं ताटंकसूर्ययुगलं॥श्रुत्यास्पदं श्रुती कर्णौ आस्पदं स्थानं यस्यतत् पक्षे श्रुतीनां वेदानामास्पदं स्थानं त्रयीतनुत्वात्सूर्यस्य ॥वेदे श्रवसि च श्रुतिरित्यमरः ॥ तथा॥ सुविमलैर्वसुभिः मणिभिः पक्षे किरणैः कृत्वा प्रशोभं प्रकृष्टशोभं-॥ वसुर्देवेऽग्नौ रश्मौ च वसु तोये धने मणाविति विश्वात्॥वसंततिलका वृत्तं ॥ ७७ ॥

अधरे विद्रुमच्छाये लक्ष्यते ते द्विजस्थितिः ॥ अ
पि मन्ये सुधाहेतुं तृषार्तास्ते समापतन् ॥ ७८ ॥

कस्याश्चिदधरे स्वकृतदंतक्षतान्यालोक्य तां प्रत्याह ॥ अधरइ-

ति ॥ हेप्रिये विद्रुमच्छाये विद्रुमवत्प्रवालवच्छाया कांतिर्यस्य त-
स्मिन् ॥ श्लेषेण विगता द्रुमच्छाया वृक्षच्छाया यस्मिंस्तादृशेऽपि
ते तव अधरे द्विजसंस्थितिः द्विजानां दंतानां अर्थान्मदीयानां
स्थितिः ॥ अथच द्विजानां पक्षिणां स्थितिः ॥ लक्ष्यते क्षतै रनु-
मीयते ॥ पक्षे दृश्यते ॥ तत्रोत्प्रेक्षते ॥ सुधाहेतुं सुधायाः कारणं
अधरं प्रति ते द्विजाः तृषार्ताः संतः सम्यगापतन् प्राप्ता इत्यहं
मन्ये ॥ द्रुमरहितस्थाने द्विजस्थित्यभावेऽपि तृषार्तत्वादेवंविधेऽपि
सुधास्थानत्वात् तेषामापतनं युक्तमितिभावः ॥ ७८ ॥

निष्कलंकेंदुतुल्याऽऽस्ये त्वन्मुखेंदौ निमज्जति ॥
अन्विष्यांऽकमिवोद्धर्तुं चेतो मे प्रसभं द्रुतं॥७९॥

अपरां प्रत्याह ॥ निष्कलंकेति ॥ हे निष्कलंकेंदुतुल्याऽऽस्ये निष्क
लंकचंद्रसदृशवदने मे चेतः त्वन्मुखेंदौ त्वन्मुखचंद्रे निमज्जति
निमग्नं भवति ॥ अत्रोत्प्रेक्षते ॥ अन्विष्य शोधयित्वा प्रसभं
बलात्कारेण द्रुतं शीघ्रं अंकं कलंकं उद्धर्तुमिव निष्कासयितुमि-
व ॥ प्रसिद्धचंद्रे कलंकदर्शनेन चंद्रमात्रे कलंकित्वानिश्चयात्त्वन्मु-
खेंदौ बहिः कलंकाऽनुपलब्धावपि कदाचिदंतः स्थितः स्यादिति
संभाव्य तमुद्धर्त्तु मिवांऽतर्निमग्नमभूदिति भावः ॥ ७९ ॥

सहोदरस्नेहसमाकुलस्य सोमस्य चांऽकस्थितमी
नयुग्मम्॥ तथा तवाऽऽनंदपदे मुखेंदौ सुनेत्रयु
ग्मं हि विराजतेऽस्मिन् ॥८०॥

अन्यां प्रत्याह ॥ सहोदरेति ॥ प्रिये अस्मिन् आनंदपदे आनंद-
स्थाने तव मुखेंदौ मुखचंद्रे सुनेत्रयुग्मं तथा विराजते ॥ तथा

कथं ॥ सहोदरस्नेहसमाकुलस्य सहोदरस्य संबंधी यः स्नेहस्तेन
समाकुलस्य व्याप्तस्य सोमस्य चंद्रस्य अंकस्थितमीनयुग्मं अं-
के उत्संगे स्थितं यन्मीनयुग्मं ॥ तद्यथा ॥ चंद्रमीनयोरुभयोरपि
जलोत्पन्नत्वेन सहोदरत्वं ॥ उपजातिर्वृत्तं ॥ ८० ॥

विरहाब्धिसमग्रशोषकत्वं त्वयियुक्तं शिशिरांऽशु
शोभनाऽऽस्ये॥ यदगस्त्यसमुद्भवौ सदा त्वं वहसे
सौख्यकरौ स्ववक्षसीमौ॥८१॥

अपरां प्रत्याह ॥ विरहेति ॥ हे शिशिरांऽशुशोभनाऽऽस्ये शिशि-
रांऽशुवच्चंद्रवच्छोभनं आल्हाददातृत्वेन सुंदरं आस्यं यस्यास्तत्सं-
बोधनं त्वयि॥विरहाब्धीति॥ विरह एवाऽब्धिः समुद्रस्तस्य समग्र-
शोषकत्वं संपूर्णशोषकारित्वं युक्तं अस्ति ॥ शोषकत्वमित्यत्र श-
रदः कृतार्थतेत्यादिवत् सामान्ये नपुंसकं बोध्यं ॥ यद्यस्माद्धेतोः
त्वं सौख्यकरौ ॥ एतेन जलशोषकवायुसूर्यादिवत् क्रूरत्वाऽभा-
वः सूचितः ॥ अगस्त्यसमुद्भवौ अगस्त्योत्पत्तिस्थानभूतौ घटौ ल-
क्षणया तत्सदृशौ इमौ स्तनौ स्ववक्षसि स्वहृदये सदा वहसे धा-
रयसि ॥ वहप्रापणे स्वरितेत् ॥ घटोद्भवेनाऽगस्त्येन संपूर्णसमुद्रशो-
षणं कृतमिति तत्कारणे तदर्थसिद्धमितीयमुक्तिः ॥ औपच्छंद-
सिकं वृत्तं ॥ ८१ ॥

सुमनस्सहायवानपि विततः पीनश्च केशपाश
स्ते॥ तिष्ठत्यनंगसमरे पश्चात्कौटिल्ययुग्यतोमलि
नः॥८२॥

कस्याश्चित्केशपाशं पृष्ठलंबिनं दृष्ट्वा तामाह ॥ सुमनइति ॥ हे प्रिये ते केशपाशः केशकलापः ॥ पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परइत्यमरात् ॥ सुमनःसहायवानपि कुसुमरूपसहाययुक्तोऽपि कुसुमालंकृतइतियावत् ॥ अथच देवसहायवानपि ॥ अनेन सहायसंपत्तिरुक्ता ॥ विततः विस्तृतोऽपि॥ अनेन शरीरमहत्वं द्योतितं ॥ पीनः पुष्टोऽपि अविरलोऽपीति यावत् ॥ अनेन शारीरसामर्थ्यं सूचितं ॥ अनंगसमरे अनंगस्य कामस्य समरे युद्धे ॥ अनंगपदेन युद्धकर्तुरतिदुर्बलत्वमकिंचित्करत्वं च सूचितं ॥ पश्चात् पृष्ठभागे तिष्ठति ॥ अत्र हेतुगर्भं तद्विशेषणमाह ॥ यतः कौटिल्ययुक् अरालः अथ च वक्रस्वभावः मलिनः श्यामः अथच मनः प्रभृतिमालिन्यवान् ॥ ८२ ॥

रूपौघशृंगाररसांऽकुरः किं कंजे मिलिंदोऽथ सुवर्णखंडे॥ मारस्य चिन्हं किमु राजते यः प्रिये कपोले तिलकस्तवाऽसौ॥ ८३॥

कस्याश्चित्कपोले तिलकं दृष्ट्वा तामाह ॥ रूपौघेति ॥ हेप्रिये तव कपोले अयं तिलकः तिलकाख्यं कृष्णवर्णं चिन्हं राजते॥ अत्रोत्प्रेक्षते ॥ असौ ॥ रूपेति॥ रूपौघे सौंदर्यसमुदाये यः शृंगाररसस्य अंकुरः स किं ॥ अथवा कंजे कमले मिलिंदो भ्रमरः किं ॥ अथ सुवर्णखंडे सुवर्णशकले मारस्य कामस्य चिन्हं किमु ॥ परीक्षकाः स्वर्णे उत्तमत्वबोधनार्थमंकनं कुर्वंति तद्वत्कामाख्यपरीक्षकेण त्वन्मुखोपरि उत्तमत्वबोधकमेतत्तिलकरूपं चिन्हं कृतं किमिति भावः ॥ ८३ ॥

ग० ॥ एवंविधविविधस्मरकेलिधौरेयस्य राधाधरधाराधरस्य वाक्सुधाधाराः श्रवणचषकैर्निपीय चिरविधृतविरहधनंजयतापं तत्क्षणं नलिनेक्षणास्ता विजहुः॥ २३॥

एवं कृष्णवचनान्युपनिबध्य कविरुपसंहरति ॥ एवंविधेति ॥ नलिनेक्षणास्ताः गोप्यः ॥ चिरेति ॥ चिरं चिरकालं विधृतो यो विरहधनंजयः श्रीकृष्णविरहरूपोऽग्निस्तत्संबंधी यस्तापस्तं तत्क्षणं विजहुः विशेषेण तत्यजुः ॥ किं कृत्वा ॥ राधेति ॥ धरतीति धरः राधाया धरो राधाधरः श्रीकृष्णः स एव धाराधरो मेघस्तस्य ॥ वागिति ॥ वागेव सुधा तस्या धाराः श्रवणचषकैः कर्णरूपैः पानपात्रैर्निपीय सादरं श्रुत्वेत्यर्थः ॥ कीदृशस्य ॥ एवंविधेति ॥ एवंविधाः वर्णितप्रकारकाः विविधा अनेकप्रकारा याः स्मरकेलयः कामक्रीडास्तद्विषये धौरेयो धुरीणस्तस्य ॥ २३ ॥

ततश्च॥ प० ॥ युग्मं॥ अलिकुलैर्बकुलैरतिसंकुलं घनवनैः पवनै स्सुमनोहरं ॥ उपवनैर्विमलैरवशालिभिः कलरवैः किल कोकिलकूजितैः॥ ८४॥

अथ गोपीनां श्रीकृष्णेन सह यमुनातीरगमनमाह ॥ ततइति ॥ अलीत्यादियुग्मेनच ॥ हरिणायतलोचनाः गोप्यः अमुना सुहरिणा शोभनेन श्रीकृष्णेन सह तत् प्रसिद्धं यमुनातटं आययुः

कीदृशं यमुनातटं ॥ अलिकुलैः भ्रमरसमुदायैः यद्वा अलीनां भ्रमराणां कुलानि येष्वेवंविधैरिति बकुलविशेषणं ॥ बकुलैर्बकुलवृक्षैरतिसंकुलं अतिव्याप्तं ॥ तथा ॥ घनवनैर्निबिडाऽरण्यैः पवनैर्वायुभिश्च सुतरां मनोहरं ॥ तथा ॥ विमलैर्निर्दोषैरुपवनैः क्रीडोद्यानैः तथा खशालिभिः सशब्दैः कलरवैः पारावतैः तथा कोकिलानां यानि कूजितानि तैश्च सुमनोहरं ॥ ८४ ॥

परिमलैरमलैः कमलैर्वृतं तदमुना यमुनातटमाययुः॥ सुहरिणा हरिणाऽऽयतलोचनाः सुकरिणा करिणेव करेणवः॥ ८५॥

परीति ॥ अमलैर्दुष्टगंधाऽसंभिन्नैर्म्लानत्वादिदोषरहितैरित्यर्थकमुभयविशेषणं ॥ परिमलैः सुगंधैः कमलैश्च वृतं ॥ यद्वा परिमलैः सुगंधवद्भिः ॥ अर्शआद्यच् ॥ कमलविशेषणं ॥ केन काइव ॥ सुकरिणा सुष्ठु यः करः शुंडादंडः सोऽस्यस्येति सुकरी तेन करिणा गजेन सह करेणवो हस्तिन्यइव ॥ उभयत्र द्रुतविलंबितं वृत्तं॥ द्रुतविलंबितमाह नभौ भराविति तल्लक्षणात्॥ ८५ ॥

तदवसरे ॥ सिताऽंशुकैस्सुसंवीता कुमदोत्फुल्ललोचना॥ ऊर्मिहस्ता प्रशुशुभे रससरूपा कलिंदजा॥ ॥८६॥

तदवसरइति ॥ इदं उत्तरान्वयि ॥ सितांऽशुकैरिति ॥ तदवसरे सकृष्णगोप्यागमनाऽवसरे रससरूपा उदकरूपा अथच श्यामत्वात् शृंगाररसरूपा कलिंदजा यमुना शुशुभे ॥ कीदृशी ॥ सितांऽशुकैः

सिताः शुभ्रा येंऽशवएवांऽशुका अर्थाच्चंद्रस्यकिरणास्तैः ॥ अथच शुभ्रवस्त्रैः सुसंवीता संवेष्टिता ॥ तथा ॥ कुमुदेति ॥ कुमुदान्येव कैरवाण्येवोत्फुल्लानि लोचनानि यस्याः सा ॥ अथच कुमुदे इव उत्फुल्ले लोचने यस्यास्सा ॥ तथा ॥ ऊर्मीति ॥ ऊर्मय एव लहर्यएव हस्ता यस्याःसा ॥ अथच अंगुलीयकयुक्तहस्ता ॥ एतैः श्लिष्टविशेषणैर्नायिकात्त्वं तस्याः स्फोर्यते ॥ ८६ ॥

ग० ॥ तत्र ताश्चंद्रवदनाश्चंद्रं दृष्ट्वा पृथक्पृथगित्थमथ प्रोचुः॥ २४॥

तत्रेति॥अथ आगमनाऽनंतरं तत्र यमुनातीरे ताः गोप्यः चंद्रं दृष्ट्वेत्यादि शेषं स्फुटं ॥ २४ ॥

प० ॥ वितरणिकरयोगाद्विप्रराजस्य युक्तं स्वमृतमयकरत्वं श्रीयुतत्वं शुचित्वं॥ भरत इव तथाऽपि त्वैणसंगप्रसंगाज्जननमथ जडत्वं दृश्यतेऽस्मिन् सदैव॥ ८७॥

यदूचुस्तदाह ॥ वितरणीति ॥ यद्यपीति शेषः ॥ विप्रराजस्य विप्राणां राजेति विप्रराजस्तस्य ॥ द्विजराजस्य चंद्रस्य ॥ वितरणीति ॥ तरणेः सूर्यस्य ये कराः किरणास्तेषां योगः संबंधस्तरणिकरयोगः विशेषेण तरणिकरयोगो वितरणिकरयोगस्तस्माद्विशिष्टसूर्यकिरणसंबंधाद्धेतोः ॥ स्वमृतेति ॥ सुष्ठु यदमृतं तत्प्रचुरास्तन्मयाः कराः किरणा यस्य तस्य भावस्तत्त्वं श्रीयुतत्वं शोभायुक्तत्वं शुचित्वं शुक्लत्वं च युक्तं अस्ति ॥ परिपूर्णसूर्यकिरणसंबंधे हि चंद्रस्य पूर्णत्वं पूर्णत्वे चाऽमृतमयकरत्वं तेन च विशिष्टशोभत्वं शु-

क्तत्वं च प्रतीतिगोचरो भवतीति भावः ॥ चंद्रे सूर्यकिरणसंबंधा-
त्तेजोवृद्धि त्वाह वराहमिहिरः स्वसंहितायां ॥ सलिलमये शशि-
नि रवेर्दीधितयो मूर्छितास्तमो नैशं ॥ क्षपयंति दर्पणोदरनिहिता
इव मंदिरस्यांऽतरिरिति ॥ तथापि भरते इव ऋषभदेवज्येष्ठतनये रा-
जविशेषे इव अस्मिन् चंद्रे ॥ ऐणेति ॥ एणस्य मृगस्याऽयं ऐणो-
मृगशावस्तस्य यः संगस्तत्प्रसंगात् ॥ उभयत्र तुल्यं ॥ जननं उदयः
उपलक्षणतया अस्तोऽपि ॥ पक्षे मृगत्वेन ब्राह्मणत्वेन च जन्मां-
तरं ॥ जडत्वं शीतत्वं ॥ डलयोः सावर्ण्याज्जलरूपत्वंवा ॥ पक्षे
ब्राह्मणजन्मांऽतरावच्छेदेन जडतुल्यत्वं ॥ अतएव लोके जडभरत
इति तस्य व्यवहारः सदैव दृश्यते ॥ श्लेषेण यद्यपि विप्ररा-
जस्य ब्राह्मणश्रेष्ठस्य ॥ वितरणीति ॥ वितरणं दानं तदस्याऽस्तीति
वितरणी दाता तस्य करयोगात् दानसामयिकहस्तयोगात् हे-
तोः ॥ स्वमृतेति ॥ शोभनदानोदकप्रचुरहस्तत्वं श्रीयुतत्वं लक्ष्मी-
वत्वं एवं प्रतिग्रहग्राहित्वेऽपि तपोऽतिशयहेतुकं शुचित्वं शुद्ध-
त्वं योग्यमस्ति तथाऽपि भरत इव अस्मिन् ब्राह्मणश्रेष्ठे॥ ऐणेति ॥
उपलक्षणमेतत् कुसंगस्य तेन कुसंगप्रसंगात् जननं उपलक्षणत-
या जन्ममरणे जडत्वं अज्ञत्वं च सदैव दृश्यते ॥ एवेत्यवधारणेन
तत्त्यागमंतरा कदाऽपि तस्य जननादिनिवृत्तिर्न भवतीति सूचि-
तं ॥ भरतस्यैकवारमप्यैणसंगात् जन्मादिकमभूत् चंद्रस्य तु निरं-
तरं तत्संगात् नित्यं जन्मादिकं भवतीति भावः ॥ मालिनी वृत्तं ॥
॥ ८७ ॥

तारकाणां रक्षकेऽस्मिन्नुडुपत्वं सदोचितं ॥ तत्स
हायतया पूष्णस्तरणित्वमपि स्फुटम्॥ ८८॥

अपरा आह ॥ तारकाणामिति ॥ सदा सर्वदा तारकाणां नक्षत्रा-
णां रक्षकेऽस्मिन् चंद्रे उडुपत्वं उडूनि नक्षत्राणि पातीति उडुप-
स्तस्य भावस्तत्वं नक्षत्ररक्षकत्वं उचितं योग्यं अस्ति ॥ एवं त-
त्सहायतया उडुपसहायतया पूष्णः सूर्यस्य तरणित्वमपि स्फुटं
स्पष्टं ॥ श्लेषेण सदा तारकाणां तारयंतीति तारका नद्यादौ तार-
यितारो नाविकास्तेषां रक्षके पोषके अस्मिन् उडुपत्वं प्लवत्वं ॥
उडुपं तु प्लवः कोल इत्यमरात् ॥ उचितं योग्यं ॥ नाविकानामु-
डुपाऽधीनजीविकत्वेनोडुपस्य तद्रक्षकत्वं तत्सहायतया उडुपस-
हायतया पूष्णस्तरणित्वमपि बृहन्नौकात्वमपि स्फुटं ॥ स्त्रियां नौ-
स्तरणिस्तरिरित्यमरः ॥ बृहन्नौकायां साहाय्यार्थं प्लवं निबध्नंतीति
प्रसिद्धं ॥ ८८ ॥

नूनं विष्णुपदोद्भूते शूद्रत्वं वेदवर्णितं॥ दोषाकरेऽ
पि तादृक्षे चित्रं यत् द्विजराजता॥ ८९ ॥

अन्याह ॥ नूनमिति॥नूनमिति वितर्के ॥ विष्णुपदोद्भूते विष्णोः प-
दादुद्भूते उत्पन्ने शूद्रत्वं वेदवर्णितं अस्ति ॥ पद्भ्यां शूद्रो अजायतेत्या-
दिश्रुतेः ॥ तादृक्षे विष्णुपदोद्भूते तत्राऽपि दोषाऽऽकरे दोषाणामाकरे
स्थानभूते द्विजराजता ब्राह्मणश्रेष्ठता अस्ति इति यत्तच्चित्रमाश्च-
र्यं ॥ वस्तुतस्तु विष्णुपदमाकाशं तत्रोद्भूते उदिते दोषाकरे दोषा
रात्रौ कराः किरणा यस्य तस्मिन् द्विजराजता चाऽस्ति ॥ द्विज-
राजः शशधर इत्यमरात् ॥ ८९ ॥

पूर्णत्वदर्पभरतो विकलः कलानां नाथो बभूव म
लिनो जड एष नोचेत्॥ त्यक्तुंयतेत कथमंबरमात्म

दारांश्चांकं स्मरन् प्रकृतिमेव पुनः प्रयाति ॥ ९० ॥

काचिदाह ॥ पूर्णत्वेति ॥ एष समीपवर्ती चंद्रः कलानां नाथः अतएव ॥ पूर्णत्वेति ॥ पूर्णत्वप्रयुक्तो यो दर्पस्तस्य भरोऽतिशयस्तस्मादिति ततः विकलः विशिष्टाः कला यस्य सः यद्वा विगतकलः क्षीणकल इति यावत् अथच भूताऽऽविष्ट इव व्याक्षिप्तचित्तः अतएव जडोऽज्ञः मलिनश्च बभूव ॥ तद्व्याक्षिप्तचित्तत्वमेव व्यतिरेकेण द्रढयति ॥ नोचेदिति ॥ नोचेत् पूर्वोक्तं नचेत् अंबरं आकाशं अथच वस्त्रं तथा आत्मदारान् स्वस्त्रियो नक्षत्राणि त्यक्तुं कथं यतेत यत्नं कुर्यात् ॥ लोके योहि व्याक्षिप्तो भवति स वस्त्राणि स्वदारांश्च परित्यजति मलिनो जडश्च भवति कलाभिरपि हीनो भवति तथा ऽयं चंद्रोऽपि गर्वभरेण जाड्यविष्टध्या कलाहीनः सन्नंबरदारादिपरित्यागविषयकयत्नवान् भवतीति भावः ॥ चंद्रश्चाऽस्ताऽनंतरममावास्यायां च सुतरामंबरे नदृश्यते तं विना नक्षत्राणि च दृश्यंतइतीयमुक्तिः ॥ यतेतेत्यनेन पुनरुदये तदालंबनात्सुतरां त्यागाऽभावः सूचितः ॥ नन्वेवं सति पुनः पूर्वरूपाऽऽपत्तिस्तस्य कथं भवतीत्याशंक्याह ॥ अंकमिति ॥ अंकं कलंकं पूर्णत्वगर्वप्रयुक्तेयं मदीयावस्थेति स्वस्यैव दोषमितियावत् स्मरन् सन् पुनः प्रकृतिं पूर्वरूपं प्रयाति प्राप्नोति ॥ एतावानेव पिशाचादिव्याक्षिप्तस्याऽस्य च भेदः ॥ यो हि कलादिगर्ववशात् व्याक्षिप्तोभवति तस्य स्वापेक्षयाऽधिककलादिमद्दर्शनेन स्वस्य न्यूनत्वज्ञाने सति स मदो गच्छति तत्प्रयुक्तं व्याक्षिप्तत्वं च गच्छति तद्वदस्याऽपि स्वदोषज्ञानेन गर्वनाशात्पूर्वरूपाऽऽपत्तिरिति भावः ॥ वसंततिलका वृत्तं ॥ ९० ॥

पुष्करचारिणमनिमिषवर्यं धीवरजनप्रियं त्वब्जम् ॥ एरुल्लासकमेतं मन्ये तत्केतनं रथे सुभगम् ॥ ॥ ९१ ॥

अन्याह ॥ पुष्करेति ॥ अहमिति शेषः यतः एः अस्य विष्णोरपत्यं इस्तस्य एः कामस्य उल्लासकं उद्दीपकं ॥ अकारो वासुदेवः स्यात् ॥ इकार उच्यते काम इति चैकाऽक्षरात् ॥ अतः एतं चंद्रं रथे कामस्यंदने तत्केतनं तस्य कामस्य केतनं लक्षणया तत्ध्वजसंबंधिमीनरूपं चिन्हं मन्ये ॥ अत्रैव हेतुगर्भाणि उभयसाधरणानि विशेषणान्याह ॥ पुष्करेत्यादि ॥ पुष्करे आकाशे चरति तच्छीलं पक्षे पुष्करे जले चरति तच्छीलं ॥ पुष्करं खेंऽबुपद्मयोरिति मेदिनीकोशात् ॥ तथा ॥ अनिमिषवर्यं देवश्रेष्ठं यद्वा बवयोर्लरयोश्चैकत्वस्मरणात् अनिमिषाणां देवानां बल्यः स्वसंबंध्यमृतदानेन बलकरस्तं ॥ बल्यं प्रधाने धातौ स्यात्क्लीबं बलकरे त्रिषु इति मेदिनीकोशात् ॥ पक्षे मत्स्यवर्यं ॥ सुरमत्स्यावनिमिषावित्यमरात् ॥ तथा ॥ धीवरेति ॥ धिया बुद्ध्या ये वराः श्रेष्ठास्ते च ते जना ब्राह्मणास्तेषां प्रियं द्विजराजत्वात् ॥ पक्षे धीवरा जना मत्स्यवेधकजनास्तेषां प्रियं तद्यं ॥ तथा ॥ अब्जं उभयत्राऽपि अब्जो जातं ॥ अब्जो जैवातृकः सोमइत्यमरः ॥ सुष्ठुभैर्नक्षत्रैः सह भानि वा गच्छतीति सुभगस्तं ॥ पक्षे आकारविशेषेणरमणीयं ॥ गीतिरार्या वृत्तं ॥ ९१

कैरवकुलकमितारं शंबरजं बंभरो विदित्वैतम् ॥ गत्वा मग्न इवाऽयं भाति कलंकः सुधारसे सततम् ॥ ९२ ॥

अपरा चंद्रे कलंकं दृष्ट्वा उत्प्रेक्षते॥कैरवेति॥कैरवकुलकमितारं कुमुदकुलनायकं एतं चंद्रं शंबरजं जलजं पुंडरीकं विदित्वा मधुलोभेन गत्वा सुधारसे मग्नो निमग्नो बंभरो भ्रमरइवेत्युत्प्रेक्षा॥ अयं कलंकः सततं भाति॥ प्रथमं पुंडरीकबुध्या सरभसमापतन् भ्रमरो रसरूपे तस्मिन्निमग्नस्तत एव पुनर्निर्गंतुमशक्नुवन् निरंतरं कलंकरूपेण भासते इति भावः॥ गीतिरार्या वृत्तं॥ ९२॥

नक्षत्रेशो द्विजेशोऽयं सर्वत्र परिकीर्तितः॥तथाप्ये
नं हि राजेति वदंत्यत्र विचित्रता॥ ९३॥

अपरा आह॥ नक्षत्रेशइति॥ यद्यपि अयं चंद्रः यतो नक्षत्रेशः नक्षत्राणामीशोनक्षत्रेशः श्लेषेण क्षत्रेशोन भवतीति नक्षत्रेशः॥ नञर्थकेन नशब्देन सुप्सुपेति समासः॥ अतः द्विजेशः द्विजानां ब्राह्मणानां ईशः इतिसर्वत्रपरिकीर्तितः॥ युक्तमेतदिति भावः॥ तथापि लोकाइतिशेषः॥एनं चंद्रं राजेति वदंति अत्रैवंकथने विचित्रता अस्ति॥ योहि क्षत्रेशो न भवति ब्राह्मणश्रेष्ठश्च स राजा नभवतीति प्रसिद्धेः॥ राजा मृगांके क्षत्रियेऽपिचेत्यमरात्॥९३॥

पित्रा दत्तमुपानयंत्यविरलैस्तारैः प्रपूर्णं पुरा पात्रं
रौप्यमयं द्रुतं मधुभिदाऽऽश्लिष्टा रमा प्रेमतः॥
पात्रं तद्गलितं नु चंद्र इति तांस्तारांस्तुतारा इति लो
कास्तद्धृतिकारणं त्वविरतं सर्वे वदंत्यंबरं॥ ९४॥

अन्याआह॥ पित्रेति॥ पुरा पूर्वं विवाहोत्तरं प्रथमसंगमकाले इति यावत् पित्रा रत्नाकरेण दत्तमर्पितं अविरलैः पुष्कलै

स्तारैः शुद्धमौक्तिकैः प्रकर्षेण पूर्णं रूप्यमयं पात्रं उपानयंती स्वसमीपमानयंती रमा लक्ष्मीः मधुभिदा माधवेन प्रेमतः प्रेम्णा द्रुतं शीघ्रं॥ एतेन तादृशपात्राऽऽनयनसामयिकशोभादर्शनेनाऽत्यंतोत्कंठोदयेन तत्पात्रस्याऽधःस्थापनकालविलंबाऽसहिष्णुत्वं सूचितं॥ आश्लिष्टा आलिंगिता आसीत्॥ तत् तदा संभ्रमेणालिंगनसमये गलितं अधः पतितं यत् पात्रं मौक्तिकपरिपूर्णं रूप्यमयं तत् कर्मभूतं चंद्रइति तान् पात्राद्गलितांस्तारांस्तु मौक्तिकानि कर्मभूतानि तारा इति नक्षत्राणीति तद्धृतिकारणं तयोरुभयोर्धृतिकारणं धारणकारणं अंबरमिति च सर्वेलोका अविरतं वदंति॥ अंबरशब्देनाऽऽकाशवस्त्रयोरभेदाध्यवसायः॥ लोकैर्हि भूमौ पतितानां पदार्थानां संचयनमंबरे क्रियतइति प्रसिद्धं॥ शार्दूलविक्रीडितं वृत्तं॥ ९४॥

किंच॥ उडुपतरणिसंप्रचरणयोग्यं तारोद्भवं सुरा
सदनं॥ नाब्धिं वदंति चित्रं किं त्वंबरमिति जना
जलधरं वै॥ ९५॥

एतत्श्लोकोक्तांऽबरपदेन स्फुरितमाकाशं सैव वर्णयति॥ किंचेति॥ उडुपेति॥ जनाः अंबरमाकाशं अब्धिं न वदंति किंतु अंबरमिति वदंति इति चित्रमाश्चर्यं॥अब्धित्वकथनकारणभूतानि साधारणानि विशेषणान्याह॥उडुपेत्यादि॥ उडुपश्चंद्रस्तरणिः सूर्यस्तयोर्यत्संप्रचरणं सम्यक्प्रचारस्तद्विषये योग्यं पक्षे उडुपं प्लवोऽल्पनौः तरणिर्महानौः तयोः सम्यग्यत्प्रचरणं संचारस्तद्योग्यं॥ उडुपतरणीत्यत्र द्वंद्वे तरणेर्घ्यंतत्वेपि घ्यंतादजाद्यदंतं पूर्वविप्रतिषे-

धेनेत्यनेनोडुपस्य पूर्वनिपातः ॥ तथा॥तारेति ॥ ताराणां नक्षत्राणां पक्षे ताराणां शुद्धमौक्तिकानां उद्भवः प्रादुर्भावो यस्मिन् इति॥तथा॥सुरेति ॥सुराणां देवानां आ समंतात् सदनानि यस्मिंस्तत् पक्षे सुरायाश्चतुर्दशरत्नांतर्गतायाः मदिरायाः सदनं गृहं ॥ तथा ॥ जलधरं जलधरा मेघाः संत्यस्मिंस्तज्जलधरं ॥ अर्शआद्यच् ॥ पक्षे जलानां धरो धारकस्तं वैपादपूरणे गीतिरार्या वृत्तं ॥ ९५ ॥

ग०॥तदनंतरं तानिरंतररमणीयतत्किरणश्रेणिमिश्रणाऽतिधवलरेणुभरमृदुलमृदुले विमले तस्मिन्स्थले॥ २५॥

अथ महारासोत्सवं वर्णयति ॥ तदनंतरमिति ॥ तदनंतरं चंद्रवर्णनानंतरं ॥ निरंतरेति ॥ निरंतरमनिशं रमणीया या तत्किरणश्रेणिश्चंद्रकिरणपंक्तिस्तस्या मिश्रणेन मेलनेनाऽतिधवलो यो रेणुभरः सूक्ष्मसिकतानिकरस्तेन मृदुलमृदुले अतिमृदुले विमले निर्मले यद्वा उपसर्गाऽभावाद्दोषशून्ये तस्मिन् स्थले श्रीयमुनातटे ताः अस्योत्तरश्लोकस्थेन नृत्यं चक्रुरित्यनेनान्वयः ॥ २५ ॥

प० ॥ बाहुस्वर्णलताभिरेतममिता उद्ग्रथ्य रासोत्सवे नानारूपधरं हरिं सुखकरं नृत्यं प्रचक्रुस्तदा॥ वल्गत्पीनकुचं नटत्कचचयं सर्पत्सुसूक्ष्मांबरं नानाकल्परवं भवत्स्वरभरैः श्रोत्रप्रियं प्रेमतः॥ ९६॥

बाह्विति ॥ ताइतिशेषः ॥ तदा अमिता अपरिमितास्ता गोप्यः अतएव नानारूपधरं अनेकरूपधारिणं ॥ कृत्वा तावंतमात्मानं यावतीर्व्रजयोषितइत्याद्युक्तेः ॥ एतं हरिं रासोत्सवे बाहुस्वर्णल-

ताभिः बाहवएव स्वर्णलतास्ताभिः उद्ग्रथ्य भगवद्बाहुभिः स्वबाहून्मेलयित्वेत्यर्थः ॥ प्रेमतः स्नेहपूर्वकं नृत्यं लास्यं प्रचक्रुः ॥ कीदृशं नृत्यं ॥ सुखकरं ॥ एतेन तांडवव्यावृत्तिः ॥ नृत्यस्य लास्यतांडवभेदेन द्वैविध्यं साहित्यदर्पणे अन्यद्भावाश्रयं नृत्यं नृत्तंताललयाश्रित मित्यनेन पदार्थाभिनयोनृत्यमभिनयशून्यं गात्रविक्षेपमात्रं नृत्तमिति नृत्यनृत्तयोर्भेदं प्रदर्श्य मधुरोद्धतभेदेनतद्द्वयंद्विविधंपुनः॥ लास्यतांडवरूपेण नाटकाद्युपकारकमित्यनेनदर्शितं ॥ सुकुमारंद्वयमपि लास्यमुद्धतं द्वितयमपि तांडवमितितदर्थः ॥ तथा ॥ वल्गदिति ॥ वल्गंतः कंपंतः पीनाः कुचा यस्मिंस्तत् ॥ तथा ॥ नटदिति ॥ नटन् नृत्यन् कंपमान इति यावत् एवंविधः कचचयः केशसमूहो यस्मिंस्तत् ॥ तथा ॥ सर्पदिति ॥ सर्पंति विगलंति सुतरामत्यंतं सूक्ष्माण्यंबराणि वस्त्राणि यस्मिंस्तत् ॥ तथा॥ नानेति ॥ नाना अनेके आकल्पानां भूषणानां रवाः सिंजितानि यस्मिंस्तत् ॥ तथा॥ भवदिति॥ भवंत उत्पद्यमाना ये स्वरभरा गानादिसंबंधिनस्तैः श्रोत्रप्रियं कर्णमधुरं ॥ वल्गदित्यादिविशेषणचतुष्टयं क्रियाविशेषणत्वेन वा व्याख्येयं ॥ शार्दूलविक्रीडितं वृत्तं ॥ ९६ ॥

किंकिणीकंकणानां च क्वणतां कर्णकः क्वणः ॥ पस्पर्शाऽस्पृश्यमाकाशं जनिहेतुरितीव किम्॥ ९७॥

किंकिणीति ॥ क्वणतां शब्दायमानानां ॥ किंकिण्यश्च मेखलादिसंबंधिन्यः कंकणानि वलयानि च तेषां चकारान्नूपुरहारादीनांच कर्णकः कर्णयोः कं सुखं यस्मादिति कर्णकः कर्णसुखकारी क्वणो ध्वनिः अस्पृश्यमपि अनवयवत्वेन स्पर्शाऽनर्हमपि आकाशं पस्पर्श स्पृष्टवान् ॥ बाहुल्यात् आकाशं व्याप्नोतिस्मेत्यर्थः॥

अत्र हेतुमुत्प्रेक्षते ॥ जनिहेतुरिति ॥ जनेरुत्पत्तेर्हेतुः कारणमितीव किं ॥ स्वपितुरितरदृष्ट्या ऽस्पृश्यत्वेऽपि पुत्रस्य दृष्ट्या परमपूज्यत्वेन स्पृश्यत्वमस्येवेति भावः ॥ १७ ॥

नृत्योद्भवं श्रमजलं शुशुभे शरीरे कृष्णस्य चारु नितरां व्रजसुंदरीणां ॥ चित्तं प्रपूर्य ननु नैजभरेण तेषां सम्यक्ततः किल गलन् प्रणयप्रपूरः ॥ १८ ॥

नृत्योद्भवमिति ॥ कृष्णस्य व्रजसुंदरीणां च शरीरे नृत्योद्भवं चारु सुंदरं ॥ एतेन दौर्गंध्यादिलौकिकधर्मव्यावृत्तिः ॥ श्रमजलं स्वेदोदकं नितरामत्यतं शुशुभे ॥ अत्रोत्प्रेक्षते ॥ चित्तमिति ॥ निजएव नैजः स्वकीयो यो भरोऽतिशयस्तेन ॥ तेषां कृष्णस्य व्रजसुंदरीजनानां च चित्तं सम्यक् प्रपूर्य पूर्णं कृत्वा अथ ततश्चित्तात् गलन् प्रवहन् प्रणयप्रपूरः प्रेमप्रवाहः किलेति संभावनायां ॥ अपरिमितमुदकादि परिछिन्नपात्रे ऽसमाविशद्बहिरुच्छलति तद्वदपरिमितः प्रेमपूरः परमाणुरूपत्वात्परिछिन्नेषु हृदयेष्वसमाविशन् श्रमजलरूपेण बहिर्निःसृतवानित्यर्थः ॥ वसंततिलका वृत्तं ॥ १८ ॥

ग० ॥ तदवसरे वृंदावनपरिसरे कुटिलाऽलकाऽऽकुलकामिनीवदनभ्रमद्भृंगस्वर्णाऽर्णोजमिश्रप्रत्येककुंचितकुंतलकुलाऽऽकीर्णकृष्णाऽऽननामिलन्मिलिंदवृंदेंदीवरनिकरतत्कुचकुड्मलैः परमहृद्यं तरलतरतन्नेत्रप्रोष्ठीप्रकरप्रचुरं नर्त्तनरयनृत्यदाभरणगणगलितललितमणिश्रेणिस्वच्छतरवालु

कं चलन्नूपुरादिमभूषणसलिलपतत्रिसंदोहशब्दितं दिविषद्वैणिकैणांकाऽतःकरणैर्निपुणैः कृताऽवगाहं नानाऽभिनयकरणकंपमानक्वणत्कंकणकदंबोर्मिकं शृंगाराऽमृतपरिपूरितमद्भुतं रंगतटाकमतितरां रराज ॥ २६ ॥

अथ तटाकरूपकेण नृत्यस्थानं वर्णयति ॥ तदवसरइति ॥ नृत्याऽवसरे वृंदावनपरिसरे वृंदावनपर्यंतभूमौ अद्भुतं रंगतटाकं रंगएव नृत्यस्थानमेव तटाकं कासारः तत् अतितरां रराज शुशुभे ॥ कीदृशं ॥ कुटिलेत्यादि ॥ कुटिला येऽलकास्तैराकुलानि व्याप्तानि यानि कामिनीवदनानि तान्येव भ्रमद्भृंगविशिष्टानि स्वर्णाऽर्णोजानि स्वर्णकमलानि तैर्मिश्राणि मिलितानि यानि ॥ इदमिंदीवरविशेषणं ॥ प्रत्येकं कुंचितेन कुंतलकुलेन केशसमूहेनाऽऽकीर्णानि यानि कृष्णाऽऽननानि तान्येव मिलन्मिलिंदवृंदानि संगतभ्रमरवृंदानि इंदीवराणि नीलोत्पलानि तेषां निकरः स च तासां गोपीनां कुचाएव कुड्मलानि कमलकलिकाः तानि च तैः कृत्वा परमहृद्यमत्यंतरमणीयं ॥ तथा ॥ तरलेति ॥ तरलतराण्यतिशयितचंचलानि यानि तन्नेत्राणि श्रीकृष्णस्य गोपीनां च नयनानि तान्येव प्रोष्ठ्यः शफर्यः ॥ प्रोष्ठी तु शफरी द्वयोरित्यमरः ॥ तासां यः प्रकरः समूहस्तेन प्रचुरं व्याप्तमिति यावत् ॥ तथा ॥ नर्तनेति ॥ नर्तनरयेण नृत्यवेगेन नृत्यन् कंपमान इति यावत् एवंविधो य आभरणगणो भूषणसमूहस्तस्माद्गलिता ये ललितमणय स्तेषां या श्रेणिः सैव स्वच्छतरा वालुका यस्मिंस्तत् ॥ तथा ॥ चलदिति ॥

चलंति चंचलानि यानि नूपुरप्रभृतीनि भूषणानि तान्येव सलिलपतत्रिण स्सारसादिजलपक्षिणस्तेषां यः संदोहः समूहस्तेन शब्दितं शब्दयुक्तं कृतं ॥ शब्दवच्छब्दाद्धात्वर्थे णिचि इष्ठवद्भावे विन्मतोर्लुगिति लुकि ततः क्तप्रत्ययः ॥ तस्य शब्दितं यस्मिन्निति व्यधिकरणबहुव्रीहिर्वा ॥ तथा ॥ दिविषदिति ॥ निपुणैः कुशलैः दिविषदोदेवाः वैणिका वीणावादका गंधर्वकिन्नरादयः एणांकश्चंद्रः एषां द्वंद्वे तेषां यान्यंतःकरणानि तैः कृताऽवगाहं कृतमज्जनं ॥ एतेषामंतःकरणानां तदवलोकनेन तदेकतानत्वादियमुक्तिः ॥ तथा ॥ नानेति ॥ नानाऽनेकविधा ये ऽभिनयास्तेषां यत्करणं तेन कंपमानानि अतएव क्वणंति शब्दायमानानि यानि कंकणानि तेषां कदंबाः समूहा एवोर्मयो लहर्यो यस्मिंस्तत् ॥ शैषिकः कप् ॥ तथा ॥ श्रृंगारेति ॥ श्रृंगारएवैतदाख्योरसएवामृतमुदकं तेन परिपूरितं परिपूर्णं ॥ २६ ॥

प० अथ हरिर्हरिणैर्हरिभिः शशैः परिवृतं परितः परिदर्शयन् ॥ तरणिजामणिजालसमप्रभाऽमलजले विजहार रतिप्रदः ॥ ९९ ॥

अथ हरिस्ताभिर्जलक्रीडां कृतवानित्याह ॥ अथेति ॥ अथबहिर्नृत्यसमाप्त्यनंतरं रतिप्रदः प्रीतिदाता सुरतसुखदाता वा हरिः श्रीकृष्णः हरिणैः मृगैर्हरिभिर्वानरैः शशैश्च परिवृतं वनमितिशेषः ॥ परितः सर्वतः अर्थाद्गोपीः दर्शयन् सन् ॥ तरणिजेति ॥ तरणिजाया यमुनायाः मणिजालसमप्रभं मणिसमूहसदृशनिर्मलप्रभं अतएव निर्मलमकलुषं यज्जलं तस्मिन्विजहार ताभिः सह रेमे ॥ द्रुतविलंबितं वृत्तं ॥ अग्रिमश्लोकद्वयेऽपीदमेव वृत्तं ॥ ९९ ॥

मुकुलिताऽऽकुलिताऽरुणलोचनः सुरमणी रमणीजनवल्लभः ॥ विहरणं हरणं खलु चेतसः सुतनुते तनुते यमुनाजले ॥ १०० ॥

मुकुलितेति ॥ सुरमणिः सुरेषु देवेषु मणिरिव मणिः श्रेष्ठः श्रीकृष्णः सुतनुते सुतेन प्रत्यासत्त्या श्रीकृष्णसुतेन मदनेन नुते स्तुते यमुनाजले विहरणं क्रीडनं तनुते विस्तारयति ॥ कीदृशः सुरमणिः ॥ मुकुलितेत्यादि ॥ मुकुलिते क्रीडनसुखेन मीलिते जागरवशादाकुलिते अतएवा ऽरुणे लोचने नेत्रे यस्य सः ॥ तथा ॥ रमणीति ॥ रमणीजनस्य वल्लभः प्रियः ॥ कीदृशं विहरणं ॥ खलु निश्चये चेतसोंऽतः करणस्य हरणं ह्रियतेऽनेनेति हरणं हरणकारणं ॥ ॥ १०० ॥

हरिविहारविहारितविक्रमः शशधरोऽप्यधरीकृतलोचनः ॥ अगणितोडुगणैः परिवारितः पदमहो न ससर्प नभोंऽगणे ॥ १०१ ॥

श्रीभगवत्क्रीडादर्शनेन नभसि चंद्रस्य स्थैर्यं वर्णयति ॥ हरीति ॥ अहो आश्चर्ये हरिणा प्रयोजककर्त्रा विहारेण स्वक्रीडया प्रयोज्यकर्त्र्या विशेषेण हारितः विक्रमः अथवा विशेषेण क्रमो गतिर्यस्य स हरिविहारविहारितविक्रमः अथवा णिजर्थाऽविवक्षया हरिविहारेण कर्त्रा हारितो हृतो विक्रमो यस्यसः अतएवाऽधरीकृते दर्शनौत्सुक्यादधःकृते लोचने येन स तथा ॥ अगणितेति ॥ अगणितानि यान्युडूनि नक्षत्राणि तेषां गणैः परिवारितः

परिवेष्टितः ॥ शशधरोऽपि चंद्रोऽपि नभोंऽगणे आकाशांऽगणे ॥ अत्रपृषोदरादित्वाण्णत्वं ॥ वस्तुतस्तु नभोंगनइत्येव योग्यः पाठः॥ पृषोदरादित्वकल्पनं तु नयोग्यं ॥ अंगनं प्रांऽगणेऽपि स्यात्कामिन्यामंगना मतेति विश्वमेदिन्यादिकोशस्थनांतवर्गे पाठविरोधात्॥ णांतवर्गे तस्याऽकथनाच्च ॥ पदमपि न ससर्प एकं पदमपि नचलितवानित्यर्थः ॥ १०१॥

एवं विहृत्य विरहानलतीव्रतापं संह्वत्य ताः क्षणमिव क्षणदां विमृश्य॥ गेहं ययुः प्रतिनिवृत्त्य तदाज्ञया नाऽसूयन्विमोहितधियः पतयः किलाऽऽसाम्॥ १०२॥

रासक्रीडावर्णनमुपसंहरति ॥ एवमिति ॥ ता गोप्यः एवं पूर्वोक्तप्रकारेण विहृत्य विहारं कृत्वा ॥ विरहेति ॥ विरहएवाऽनलोऽग्निस्तत्संबंधिनं तीव्रं तापं संह्वत्य॥ क्षणदां रात्रिं॥ क्षणदा क्षपेत्यमरात्॥ क्षणमिव क्षणतुल्यामित्यर्थः॥ विमृश्य मत्वा ॥ विहाररसनिमग्नचित्तत्वेनेत्यर्थः॥ अतएव क्षणदापदप्रयोगः ॥ क्षणमुत्सवं ददातीति तदर्थः ॥ तदाज्ञया श्रीकृष्णाऽऽज्ञया प्रतिनिवृत्त्य गेहं ययुः ॥ ननु तत्पत्यादिभिः कथमंगीकृता इत्यत आह ॥ नेति ॥ आसां गोपीनां पतयः विमोहितधियः भगवन्मायाविमोहितबुद्धयः संतो नाऽसूयन् ईर्ष्यां न कृतवंतः ॥ कंड्वादेरसूञोलङि रूपं ॥ वसंततिलका वृत्तं ॥ अग्रिमश्लोके प्येतदेव वृत्तं ॥ ॥ १०२ ॥

चंचन्मिलिंदकुलझंकृतिशब्दितेऽस्मिन्पुष्प्यत्सुमप्रसृतगंधघने वने ऽसौ॥ नृत्यद्वधूजनकदंबकमध्यवर्ती शश्वत्पुनातु कृपया रससिंधुरस्मान्॥ १०३॥

प्रकरणसमाप्तौ कविर्मंगलमाचरति ॥ चंचदिति ॥ अस्मिन् ध्याननसन्निधापिते वृंदावनाख्ये वने शश्वन्निरंतरं ॥ नृत्यदिति ॥ नृत्यंतो ये वधूजनानां व्रजस्त्रीणां कदंबकाः सात्विकराजसादिभेदभिन्नास्तेषां मध्ये वर्तनशीलः असावप्राकृतः रससिंधुः सर्वरसनिधानं श्रीकृष्णः अस्मान् बहुवचनात्सपरिवारान् कृपया सदा पुनातु॥ शश्वदित्यस्य मध्यमणिन्यायेनोभयत्र संबंधः ॥ कीदृशे वने ॥ चंचदिति ॥ चंचत् शोभमानं यन्मिलिंदकुलं भ्रमरकुलं तत्कर्तृकया झंकृत्या शब्दिते सशब्दीकृते ॥ भ्रमरसंचारेहेतुगर्भं वनस्य विशेषणांतरमाह ॥ पुष्प्यदिति ॥ पुष्प्यंति विकसंति यानि सुमानि पुष्पाणि तेभ्यः प्रसृता ये गंधाः स्वस्वजातीयसौरभाणि तैर्घने सांद्रे ॥ एताभ्यां विशेषणाभ्यां वृंदाने निरंतरमुद्दीपकसामग्रीसमृद्धिः सूचिता ॥ १०३ ॥

॥ इतिश्रीबालकृष्णचंपूव्याख्यायां ॥

चतुर्थः स्तबकः समाप्तः॥ ४ ॥